होष्यति जुहोतु जुहुतात् हेर्धिः जुहुधि आडिपरत्वाद्गुणः जुहवातिप

रत्वाज्जुसिचेतिगुणः अजहवुः जुहुयात् हूयात् अहोषीत् जिभीभये
बिभेति भियोन्यतरस्याम् इकारःस्याद्धलादौक्ङिति सार्वधातुके बिभीतः
बिभितः बिभ्यति बिभयांचकार बिभाय भेता ह्रीलज्जायां जिह्रेति
जिह्रीतः जिह्रियति जिह्रयांचकार जिह्राय पॄपालनपूरणयोः अ
र्त्तिपिपर्त्योश्च अभ्यासस्याइकारोन्तादेशःस्यात् श्लौ उदोष्ठ्यपूर्वस्य
अङ्गावयवोष्ठ्यपूर्वोयिऋृद्रंतदन्तस्याङ्गस्य उत्स्यात् गुणवृद्धीपर
त्वाद्विमन्वाधेते पिपर्त्ति उरव्रं हलिचेतिदीर्घः पिपूर्वःपिपुरति प
पार किति लिटि ऋच्छत्वृतामिति गुणेप्राप्ते श्वृदृप्रां ह्रस्वो वा एषां
किति लिटि ह्रस्वो वा स्यात् पक्षे गुणः पप्रतुः प्रपत्रुः पपरतुः

पपरुः परिता परीता अपिपः अपिपृतां अपिपरुः पिपूर्यात् अपारीत् अपा
रिष्टां ह्रस्वान्तोयमिति केचित् पिपर्त्ति पिपृतः पिप्रति पिपृयात् आशिषि प्रि
यात् अपार्षीत् पाणिनीयमते तु तरीदसी पिपृत मित्यादौ छान्दसत्वं शरणं डुभृ
ञ् धारणपोषणयोः भृञामित् भृञ्माङ् ओहाङ् एषां त्रयाणां अभ्यासस्य इत्स्या
त् श्लौ विभर्त्ति विभृतः विभ्रति विभृषे श्लुवद्भावाद्द्वित्वे विभरामास वभा
र वभर्थ वभृव विभराणि अविभः अविभृतां अविभरुः विभृयात् भ्रिया
त् भृषीष्ट अभार्षीत् अभृत माङ् माने शब्दे च ईहल्यघोः श्नाभ्यस्तयोरातः ई
त्स्यात् सार्वधातुके क्ङिति हलि मिमीते श्नाभ्यस्तयोरित्यालोपः मिमाते मिमते
प्रण्यमास्त ओहाङ् गतौ जिहीते जिहाते जिहते जहे हता हास्यते ओहा

सि॰
७८

क्ङ्सार्गे परस्मैपदी जहीति जहातेश्च इत्याद्धालादौ क्ङिति सार्वधातुके पक्षेई
त्वं जहितः जहीतः जहति जहौ जहातु जहितात् जहीतात् आ च हौ ज
लोपोपि जहातेराततोलोपः स्याघादौ सार्वधातुके जह्यात् एलिङि हेयात्
अहासीत् डुदाञ् दाने प्रणिद्दातिदत्तः ददाति ददे ददौ घ्वसोरित्येत्वा
भ्यासलोपौ देहि अददात् अदत्तां अददुः दद्यात् देयात् अदात् अ
दातां अदादुः अदित डुधाञ् धारणपोषणयोः दानेप्येके प्रणिदधाति
दधस्तथोश्च द्विरुक्तस्य झषंतस्य धातोः बशोभष् स्यात्तथयोस्ध्वोश्च परतः
वचनसामर्थ्यादालोपोनस्थानिवदितिवामनमाधवौ वस्तुतस्तु पूर्वत्रासिद्ध

७८

नस्यानिवत् धत्तः दधति धत्स्व दध्वः धत्ते धत्से धध्वे धेहि अधित
अथत्रयः स्वरितेतः णिजिर् शौचपोषणयोः निजांत्रयाणां गुणः श्लौ णि
ज विजविषामभ्यासस्य गुणः श्लौ नेनेक्ति नेनिक्तः निनेज नेक्ता ने
क्ष्यति नेनेक्तु नेनिग्धि नाभ्यस्तस्याचि पिति सार्वधातुके लघूपधगु
णो नस्यात् नेनिजानि अनेनेक् अनेनिक्तां अनेनिजुः नेनिज्यात्
निज्यात् अनिजत् अनैक्षीत् अनिक्त विजिर् पृथग्भावे वेवेक्ति वे
विक्ते विवेजिथ अत्र विजइडिति ङित्वं न ओविजी इत्यस्यैव न तु ग्रहणात्
णिजिवीजीरुधादावपि विष्लृ व्याप्तौ वेवेष्टि वेविष्टे लृदित्वादङ् अविषत्
तङि क्सः अजादौ क्सस्याचि इत्यल्लोपः अविक्षत अविक्षातां अविक्षंत अ

सि॰
७५

थाऽऽगणांतासरस्मैपदिनः छांदसाश्च घृक्षरणदीप्त्योः जिघर्म्मीत्येंहविषा
घृतेनमज्जामित् बहुलंछांदसीतित्वं हृप्रसह्यकरणे अयंस्तुवोअभिजह
र्त्तिहोमात् ऋस्टगतौ बहुलंछंदसीत्येवसिद्धे अर्तिपिपर्त्योश्चेतीविधा
नाद्दयंभाषायामपि अभ्यासस्यासवर्णइतिइयङ् इयर्त्ति इयृतः इय्रति आ
रआरतुः इडत्त्यर्तीतिनित्यमिट् आरिथ अर्त्ता अरिष्यति इयर्णात् एरि
यः इयृतां इयरुः इयृयात् अर्यात् आरत् ससर्त्ति भसभर्त्सनदीप्त्योः ब
भस्तिघसिभसोर्हलिचेत्युपधालोपः झलोझलीतिसलोपः बब्धः बभसति
बप्स्यति किज्ञाने चिकेति तुरत्वरणे तुतोर्त्ति तुतूर्त्तः तुतरति धिषशब्दे
दिधेष्टि दिधिष्टः दिधेषाणि दिधेषावदिधेषाम धनधान्ये दधंति दधन्तः

७५

दधनति जनजनने जजंति जनसनखनांसन्झलोः षामाकारोन्तादेशःस्या
ज्झलादौसनिक्ङितिचजजातः जज्ञंति जनंसि जजान जजन्यात् जजायात्
गास्तुतौदेवान् जिगाति सुम्नयुः जिगीतः जिगाति इतिष्टुहोत्यादयः॥ ॥दिवु
क्रीडाविजिगीषाव्यवहारद्युतिस्तुतिमोदमदस्वप्नकांतिगतिषु दिवंताः पर
स्मैपदिनः दिवादिभ्यःश्यन् शपोपवादः हलिचेतिदीर्घः दीव्यति दिदेव
देविता देविष्यति दीव्यतु अदीव्यत् दीव्येत् दीव्यात् अदेवीत् अदेवि
ष्यत् षिवुतंतुसंताने परिषीव्यति परिसिषेवन्यषेवीत् न्यसेवीत् ष्ठिवु
गतिशोषणयोः ष्ठिवुनिरसने केचिदिहेमंनपठंति क्षुमसुअदनेआदानइत्ये
के अदर्शनइत्यपरे स्नुप्यति सुक्ष्णोस क्ष्मसुनिरसने स्नस्यति सस्नासक्र

सि
७८

सुकुरणदीप्त्योः हूरणं कौटिल्यं चक्नास व्युषदाहे वुव्योष क्षुषन्त न्रती गात्र विक्षेपे नृत्यति ननर्त सेसिन्वकृतन्चृतछृदृदन्तः रभ्यः परस्य सजिभन्न स्वसादेराद्धधाकस्येङ्गास्यात् नर्तिष्यति नर्त्तस्य नृत्येत् नृत्यात् अनर्त्तीत् त्रसी उद्वेगे वाभ्राशेतिश्यन्वा त्रस्यति त्रसति त्रेसतुः तत्रसतुः कुथपूती भावे पुथ हिंसायां गुधपरिवेष्टने क्षिपप्रेरणे क्षिप्यति क्षेप्ता पुष्पविकस ने पुष्प्यति पुपुष्प तिमष्टिमष्टीम आर्द्रीभावे तिम्यति स्तिम्यति स्तीम्यति व्रीडनोदनेलज्जायां व्रीड्यति इषिगतौ इष्यति षहषुहचक्यर्थे चक्यर्थ तृप्तिः सह्यति सुह्यति जृषवृषवयोहानौ जीर्यति जजरतुः जेरतुः ज रिता जरीता जीर्येत् जीर्यात् जृस्तम्भित्यङ्वा ऋदृशोङिगुणः अजर

७८

त् अजारीत् अजारिष्टां मीयति जम्रतुः अम्रारीत् षूङ् प्राणिप्रसवे
सूयते सुषुवे स्वरतिसूतीतिविकल्पं बाधित्वाश्र्युकःकितीतिनिषेधे प्राप्ते
क्रादिनियमान्नित्यमिट् सुषुविषे सुषुविवहे सोता सविता दूङ् परिता
पे दूयते दीङ् क्षये दीयते दीङोयुट् क्ङिति दीङः परस्याजादेः क्ङिति आ
र्द्धधातुकस्य युट् युग्युवावुवङ् यणोः सिद्धो दिदी मीनाति मिनोति दीङस्य
पि च ख्यामात्वंस्याल्ल्यपि चकारा दशित्ये ज्ञिमित्ते दाता दास्यते अदा
स्त अदास्थाः डीङ् विहायसगतौ डीयते धीङ् आधारे धीयते दि
ध्ये धेता मीङ् हिंसायां हिंसात्रपाणवियोगः मीयते रीङ् श्रवणे ली
ङ् श्लेषणे विभाषालीयतेः लीयतेरितियकानिर्देशो न तु श्यना ली

सि॰
७७

लीलोरात्वंवास्यादेज्विषयेल्यपिच लेता लाता लेष्यष्यते लास्यते
एज्विषयेकिं लीयते लिल्ये व्रीङ् वृणोत्यर्थे व्रीयते विव्रिये स्वा
दय ओदितः तत्फलंतु निष्ठानत्वम् पीङ् पाने पीयते पिप्ये माङ्
माने मायते ममे ईङ् गतौ ईयते अयांचक्रे प्रीङ् प्रीतौ सकर्म
कः प्रीयते पिप्रिये अथपरस्मैपदिनश्चत्वारः शोतनूकरणे ओतः
श्यनि लोपः स्यात् श्यति श्यंतिशशौ शाता शास्यति विभाषाघ्राधेट
इतिसिचोवालुक् लुगभावे यमरमेतिइट्सकौ अशात् अशातां अ
शुः अशासीत् अशासिष्टां छोछेदने छ्यति छायात् छेयात् षों
तकर्मणि स्यति ससौ अभिष्यति अभ्यष्यत् अभिससौ दोअवखं

७७

ऊने द्यति वृद्धौ मणिदाता देयात् अदात् अथात्मनेपदिनः पंचदश ज
नी प्रादुर्भावे ज्ञाजनोर्जा अनयोर्जादेशः स्यात् शिति जायते जज्ञे जज्ञा
ते जज्ञिरे जनिता जनिष्यते दीपजनेति चिण्वा जनिवध्योश्च अनयो
रुपधाया वृद्धिर्न स्याच्चिणि ञ्णिति किति च अजनि अजनिष्ट दीपी दीप्तौ
दीप्यते दिदीपे अदीपि अदीपिष्ट पूरी आप्यायने पूर्यते अपूरि अ
पूरिष्ट तूरी गतित्वरणहिंसनयोः तूर्यते तुतूरे धूरी गूरी हिंसागत्योः धू
र्यते दुधूरे गूर्यते जुगूरे घूरी जूरी हिंसावयोहानौ शूरी हिंसास्तंभनयोः
चूरी दाहे तप ऐश्वर्ये वा अयं धातुरैश्वर्ये वा तङः श्यनो लभ्यते अन्यदा तु
शब्विकरणपरस्मैपदीत्यर्थः केचित्तु वाग्रहणं वृतुधातोरावयवमिच्छंति

तप्यते तप्ता तप्स्यते प्रतेतिव्यत्यासेन पाठांतरं श्रुतव्याख्यानियुतः पत्समानः
ऋतुवरणे ऋत्सते पक्षांतरे वावृत्यते ततोवावृत्यमानासारामृक्षालांन्य
विक्षतेतिभट्टिः क्लिश उपतापे क्लिश्यति क्लेशिता कादी तौ वाश्ट्श
ब्देवाश्यते ववाशे अथपंचस्वरितेतः मृष तितिक्षायाम् मृष्यति मृ
ष्यते ईशुचिर पूतीभावे पूतीभावः क्लेदः शुच्यति शुच्यते शुशोच अ
शुचत् अशोचीत् अशोचिष्ट णह बंधने नह्यते ननाह नेनद्ध ने
हिथ नेहे नद्धा नत्स्यति अनात्सीत् अनद्ध रंज रागे रज्यति रज्यते
शप आक्रोशे शप्यति शप्यते अथैकादशानुदात्तेतः पद गतौ
पद्यते पेदे पत्ता पद्येत अपत्सत चिण ते पदः पद श्चिणस्या त

शब्देपरे प्रण्यपादि अपत्सातां अपत्सत खिददैन्ये २ खिद्यते चिखिते खेत्ता अखित्त विदसत्तायां ३ विद्यते वेत्ता वुधअवगमने ४ वुध्यते वु
वुधे वोध्धा भोत्स्यते सुत्सीष्ट अवोधि अवुद्ध अभुत्सातां युधसंप्रहारे ५
युध्यते युयुधे योद्धा अयुद्ध अयुत्सातां कथंयुध्यतीति युधमिच्छती
तिक्यच् अनुदात्तेत्वलक्षणमात्मनेपदमनित्समितिवा अनोरुधकामे अ
नुरुध्यते ६ अणप्राणने अण्यते आणे ७ अणिता अनेतिदन्त्सातोय
मित्यके मनज्ञाने ८ मन्यते मेने मंता युधसमाधौ ९ समाधिश्चित्त
वृत्तिनिरोधः अकर्मकः युज्यते योक्ता सृजविसर्गे अकर्मकः १० संस
ज्यते सरसिजैररुणांशुभिन्नैः ससृजिषे स्रष्टा स्रक्ष्यते लिङ्सिचावि ति

सि॰
७९

क्लिशान्लगुणोनाप्यय स्लक्षीष्ट असृष्ट असृक्षाता लिष अल्पीभावे ११ लिष्य
ते लेष्टा लेक्ष्यते लिक्षीष्ट अलिक्षत अलिक्षातां अथागणांतासरस्मैप
दिनः राधोरकर्मकाद्वावेव सबकारोमित्त्रक्रमः राधोरकर्मकादेवश्यनुउ
दाहरणमाह व्याङ्गाविति यन्मसमपराध्यति क्रुध्यतीत्यर्थः विराध्यंतं
क्षमेतकः कुत्सितं राध्यत्योदनः सिध्यतीत्यर्थः क्ष्मायराध्यति देवं
पर्यालोचयतीत्यर्थः देवस्यधात्वर्थेन्तर्भावाज्जीवत्याविवदकर्मकत्वम
राध रराधतुः रराधिथ राधोहिंसायामित्येत्वाभ्यासलोपौ विहनहिंसा
र्थस्यसकर्मकत्वयादेवादिकत्वायोगात् रद्धा रात्स्यति अयंस्वादिश्च
राद्धिश्च व्यधताडने प्रहिज्या॰ विध्यति विव्याध विविधतुः विव्य

७९

विव्यथविव्यध व्यद्धा व्यत्स्यति विध्येत् विध्यात् अव्यात्सति पुषपुष्टौ पुष्यतिपुपोष
पुपोषिथ पोष्टा पोक्ष्यति पुषादीत्सङ् अपुषत् शुषशोषणे अशुषत् तुषप्रीतौ दुष
वैकृत्ये श्लिषआलिंगने श्लिष्येति शिश्लेष श्लेष्टा श्लेक्ष्यतिश्लिषः अस्मात्परस्या
निवश्लेः क्सः स्यात् पुषाद्यङोपवादः ननु च्चिणः पुरस्तादपवादन्यायात् आलिंगनेश्लि
षश्लेरालिंगनएवक्सोनान्यत्र योगविभागसामर्थ्याच्चलइगुपधादित्यस्यायंनियमः
आश्लिक्षत्कन्यांदेवदत्तः आलिंगतएवेतिकिम् समश्लिषज्जतुकाष्ठम् अङ् प्रत्या
सत्ताविहाश्लिषिः कर्मण्यनालिंगनेसिजेवनतुक्सः एकवचनेच्चिण् अश्लेषि अश्लि
क्षातां अश्लिक्षत अश्लिक्षाः अश्लिड्ढ्वम् शकिविभाषितोमर्षणे विभाषितइत्यु
भयपदीत्यर्थः शक्यति हरिंद्रष्टुंभक्तः शशाक शेकिथ शशक्थ शेके शक्ता श

शक्ष्यति शक्ष्यते अशकत् अशक्तसेट्कोयमित्येके तन्मतेनानिट्कारिकासुल्टदित्य
ठितः शकिता शकिष्यति ष्विदागात्रप्रक्षरणे घर्मस्रुतावित्यर्थः अयंजीदितिन्या
सकारादयः नेतिवृद्दत्तादयः स्विद्यति स्विद्यते सिष्वेद सिष्वेदिथ स्वेत्ता अस्वि
दत् क्रुधक्रोधे क्रोद्धा क्रोत्स्यति क्षुधबुभुक्षायां क्षोद्धा कथंक्षुधितइति संप
दादिक्विबंतात्तारकादित्वादितच् इतिमाधवः वस्तुतस्तुवसतिक्षुधोरितीट् शुध
शौचे शुध्यति शुशोधशोद्धा षिधुसंराद्धौ ऊदित्पाठःप्रामादिकः सिध्यति
सेद्धा सेत्स्यति असिधत् रधहिंसासंराध्योः। रध्यति। रजिजभोरचीतिनुम्।
ररंध। ररंधतुः। रधादिभ्यश्च। वलादिआर्द्धधातुकस्यवेट्स्यात्। ररंधिथ। ररद्ध
।ररंधिवा रेध्वा। नेट्यलिटिरधेः॥ लिट्यजेट्इतिरधेर्नुम्नस्यात्। अजि नुम् अनिटि

णश अदर्शने नश्यति ननाश नेशतुः नेशिथ मस्जिनशोर्झलि तुम्स्यात् न
नंष्ठ नेशिव नेश्व नेशिम नेश्म नशिता नंष्टा नशिष्यति नङ्क्ष्यति नहणंभू
तत्सर्वप्रतिपसर्थम् प्रनङ्क्ष्यति नशिष्यति तृप प्रीणने प्रीणनं तृप्तिः स्तर्पणं
चनाग्निः तृप्यति काष्ठानां पितृनताप्सीत् इति उभयत्र दर्शनात् ततर्पिथ त
तर्प्थ तत्रप्थ तर्पिता त्रप्ता तर्प्ता तृपस्तृप दृपामिति सिज्वा अताप्सी
त् अतर्पयत दृप हर्षमोहनयोः मोहनं गर्वः दृप्यतीत्यादि रधादित्वादिमौ
वेङ्कावमर्थमनुदात्तता द्रुह जिघांसायां वाद्रुहमुहेतिवाघः पक्षेठः दुद्रो
ग्ध दुद्रोठ दुद्रोहिथ द्रोहिता द्रोग्धा द्रोठा द्रोहिष्यति ध्रोक्ष्यति ध्लघत
योस्तुल्यंरूपं अद्रुहत् मुह वैचित्ये वैचित्यमविवेकः मुह्यति मुमोहिथ

सिं० ८१

मुमोग्ध मुमोढ मोग्धा मोग्ध मोहिता मोहिष्यति मोक्ष्यति अमुहत् ष्णुह
उद्गिरणे स्नुह्यति सुष्णोह सुष्णोहिथ सुष्णोग्ध सुष्णोढ सुष्णुहिव सु
ष्णुह्म स्नोहिता स्नोग्धा स्नोढा स्नोहिष्यति स्नोक्ष्यति अस्नुहत् ष्णिह
प्रीतौ स्निह्यति सिष्णेह वृत् रधादयः समाप्ता इत्यर्थः पुष्पाणां तादि सि
द्धांतः शमु उपशमने शमामष्टानां दीर्घः श्यनि शमादीनामित्यर्थः प्रणिशा
म्यतिः शेमतुः शेमुः शेमिथ शमिता अशमत् तमु कांक्षायां ताम्यति
तमिता अतमत् दमु उपसमे उपशामे इति णिच्यूतस्य तेन सकर्मकोयम
नलु समिव दकर्मकः अदमत् श्रमु तपसि खेदे च श्राम्यति अश्रम
त् क्षमु अनवस्थाने वा भ्राश इति श्यन्वा तत्र ह्रते शमामष्टानामिति दी

८१

र्थः श्राम्यति लुदित्वादङ् अश्रमत् शेषं भ्वादिवत् क्षमूष् सहने क्षाम्यति चक्ष मिथ चक्षंथ चक्षमिव चक्षण्व चक्षमिम चक्षण्म क्षमिता क्षंता अयंन षित् भ्वादिस्तु षित् अषितः क्षाम्यतेः क्षांतिं क्षमूषः क्षमतेः क्षमा क्लमु ग्लानौ क्लाम्यति शमीवत्श्यन्यपि ष्ठिवुक्लम्विवेव दीर्घ सिद्धे शमादिपाठे घिनुणर्थः अङ् अक्लमत् मदी हर्षे माद्यति अमदत् शमादयोऽष्टौ गताः असु क्षे पणे अस्यति आस असिता अस्यतेस्थुक् अङि परे आस्थत् अस्यधु पयोर्घादिलादङि सिद्धे अस्यतिवक्तीतिवचनं ङ्यर्थं तत्र पसर्गादस्यत्यूह्यो रितिवक्ष्यते पर्यास्थत यसु प्रयत्ने यसोनुपसर्गात् संयसश्च श्यन् वा स्या त् यस्यति यसति संयस्यति संयसति अनुपसर्गात्किं प्रयस्यति जसु मो

क्षणे जस्यति तसु उपक्षये सुच तस्यति अतसत् दस्यति अदसत् वसु स्तं
मे वस्यति ववास ववसतुः नशसददवादिगुणानामिति निषेधः वशादित्वमिति मते तु वेश
तुः वेशुः व्युष विभागे अयं दाहे पठितः अर्थभेदेन त्वयं पुनः पठ्यते औ
आदिरित्यातोयं व्युसिरित्यन्ये अयकारं बुसिरित्यपरे प्लुष दाहे अप्लुषत् पूर्व
त्र पाठः सिजर्थ इत्याहुः तत्र श्वादिपाठेन गतार्थमिति सुवचं विस प्रेरणे
विस्यति अविसत् कुस संश्लेषणे अकुसत् बुस उत्सर्गे मुस खंडने
मसी परिणामे परिमाणो विकारः समी इत्येके लुट विलोडने उच सम
वाये उच्यति औचत् माभवानुचत् भृशु भ्रंशु अधःपतने अभृशत्
अभ्रशत् अनिदितामिति नलोपः भ्रश्यति अभ्रशत् वृश वरणे वृश्य

ति अवशात् कृशतनूकरणे कृश्यति तृषपिपासायां हृषतुष्टौ श्यन्न
लौभौवादिकाद्विशेषः रुषरिषहिंसायाम् तीषसहेतिवेट् रोषिता रोष्टा डि
पक्षेपे कुपक्रोधे गुपव्याकुलत्वे युपरुपलुपविमोहने युप्यति रुप्यति लु
प्यति लोपिता लुप्यति सेट्ः अनिट्कारिकासु लिपिसाहचर्यात्तौदादिक
स्यैवग्रहणात् लुभगार्ध्ये गार्ध्यमाकाङ्क्षा तीषसहेतिवेट् लोभिता लोब्धा
लोभिष्यति लुभ्येत् लुभ्यात् अलुभत् ण्यादेरवलतात्लोभतीत्यपि साधुः
क्षुभसंचलने क्षुभ्यति णभतुभहिंसायां क्षुभिनभितुभयोर्द्युतादौ क्र्यादौ
च पठ्यन्ते तेषां द्युतादित्वादङ् सिद्धः क्र्यादित्वात् श्नासिद्धेर्भवत्येव इह पा
ठस्तु श्यन्नर्थः क्लिदू आर्द्रीभावे क्लिद्यति चिक्लेद चिक्लिदिथ चिक्लेत्थ

क्ष्विद्यति चिक्ष्वेद क्ष्वेदिता क्ष्वेत्ता ञिमिदा स्नेहने मिदेर्गुणः मेद्यति अमि
दत् द्युतादिपाठादेवामित् अमेदिष्टेति सिद्धे इह पाठोऽमेदिदीति माभूदिति द्यु
तादिभ्यो हि हिवा आत्मनेपदेषु पाठस्तूचितः ञिक्ष्विदा स्नेहनमोचनयोः ऋधु वृ
द्धौ आनर्द्ध आर्द्धत् गृधु अभिकांक्षायां अगृधत् वृत् पुषादयो दिवाद
यश्च वृत्ताः केचित्तु पुषादिसमाप्त्यर्थमेव वृत्करणं दिवादिस्तु भ्वादिवदा
कृतिगणः तेन क्षीयते म्रियते इत्यादि सिद्धिरित्याहुः इति दिवादयः षुञ् अभिष
वे अभिषवः स्नपनं पीडनं स्नानं सुरासन्धानं च तत्र स्नानेऽकर्मकः स्वादिभ्यः
श्नुः सुनोति सुनुतः हुश्नुवोरिति यण् सुन्वन्ति सुन्वः सुनुवः सुन्वहे सुनुव
हे सुषाव सुषुवे सोता सुनु सुनवानि सुनवै सुनुयात् सूयात् स्तुसुधूञ्भ्यः

इति॥ असावीत् असोष्ट अभिषुणोति अभ्यषुणोत् अभिसुषाव सुनो
तेः सासनोः स्तेसनिः षपरे सुञः षोन स्यात् विसोष्यति षिञ् बंधने सिनोति
विसिनोति सिषाय सिष्ये सेता शिञ् निशाने तालव्यादिः शेता डुमिञ्
प्रक्षेपणे मीनातिमिनोतीत्यालं ममौ ममिथ ममाथ मिम्ये माता मीया
त् मासीष्ट अमासीत् अमासिष्टां अमास्त चिञ् चयने प्रणिचिनोति
विभाषाचेः अभ्यासात्परस्य चिञः कुत्वं वा स्यात्सनि लिटि च प्रणिचिकाय
चिचाय चिक्ये चिच्ये अचैषीत् अचेष्ट स्तृञ् आच्छादने स्तृणो
ति स्तृणुते गुणोर्त्तीति गुणः ऋतश्च संयोगादेः ऋदंतात्संयोगादेः
परयोर्लिङ्सिचो रिङ् वा स्यात् स्तरिषीष्ट स्तृषीष्ट अस्तरिष्ट अस्तृत

सि॰ ८६

कृञ् हिंसायां कृणोति कृणुते चकार चकर्थ चक्रे क्रियात् कृषीष्ट अ
कार्षीत् अकृत वृञ् वरणे बभूथाततंथजगृम्ववर्थेतिनिमे एषांवेदे
इडभावोनिपात्यते तेनभाषायां थलीट् ववरिथ ववृव ववृवहे वरि
ता वरीता लिङ्सिचोरात्मनेपदेषु वृङ्वृञ्भ्यामृदंताच्च परयोर्लि
ङ्सिचोरिड्वास्यात्तङि नलिङि वृतोलिङ इटोदीर्घोनस्यात् वरिषी
ष्ट अवारीत् अवरिष्ट अवरीष्ट अवृत धुञ् कम्पने धुनुते अधौ
षीत् अधोष्यत दीर्घांतोऽप्ययम् धूनोति धूनुते स्वरतिसूतिसूयती
तिवेट् दुधविथ दुधोथ कितिसिद्दितुश्र्युकः कितीतिनिषेधम्बाधि
त्वाक्रादिनियमान्नित्यमिट् दुधुविव स्तुसुधूञ्भ्यः इतिनित्यमिट् अ

८६

धावीत् अधवीष्ट अधोष्ट अथपरस्मैपदिनः दुदुउपतापे दुनोति हिग
तौव्छ्तौच हिनुमीना उपसर्गस्यान्निमित्तासस्यैतयोर्नस्यणः प्रहिणोति हे
रवहि अभ्याघात्सरस्स हिनोतेहस्सिकुत्वं स्मान्नतुच हि जिघाय एपीतो एणो
ति पर्त्ती स्टप्रीतिपालनयोः प्रीतिचलनयोरित्यन्ये चलनंजीवनमितिस्वा
मी स्टणोति पस्पार स्पृइसेके स्टणोति एणोत्यादयस्त्रयोपिछांदसाइत्साहुः
आप्लव्याप्तौ आप्नुवंति आप्नुवः आप्ता आप्नुहि स्टादित्वादङ् आपत् श
क्लृशक्तौ अशकत् राधसाधसंसिद्धौ राध्नोति राधोहिंसायां एत्वाभ्यासलो
पोस्तः किति लिटि सेटि थलिच अपरेधतुः रेधुः रेधिथ एद्धा साध्नोति
साद्धा असात्सीत् असाद्धाम अथ ध्वावतुदात्तेतो अश्लव्याप्तौसंघातेच

अश्नुतेश्चदीर्घादभ्यासावर्णात्परस्य नुट् स्यात् आनशे आशिता अष्टा
आशिष्यते अक्ष्यते अश्नुवीत् अक्षीष्ट अशिषीष्ट आष्ट आक्षातां ष्टि
घ आस्कंदने ष्टिघ्नुते तिष्टिघे स्तेघिता अथागणांतास्स्मैपदिनः तिक
तिग च चादास्कंदने तिक्नोति तिग्नोति षघ हिंसायां सघ्नोति जिधृषा
प्रागल्भ्ये धृष्णोति दधर्ष धर्षिता दंभु दंभने दंभनं दंभः दभ्नोति ददंभ
श्रंथिग्रंथिदंभिस्वजीनां लिटः कित्वं वेति व्याकरणांतरं इहाप्याश्रीयइत्यु
क्तम् अनिदितामिति नलोपः तस्याभीयत्वादसिद्धत्वेन एत्वाभ्यासलोपयो
रप्राप्तौ दंभेश्च एत्वाभ्यासलोपौ वक्तव्यौ देभतुः ददंभतुः इदं कित्वं पितोपि
द्विषयकमिति सुधाकरादयः ददंभितिथ दंभिथ ददंभ देभ देभिथ देभोति

रूपांतरम्बोध्यम् अपिहिषयकमितिन्यासकारादिमतेतुददंभ ददंभिथ ददंभे
सेव दम्भ्यात् ऋ॰ धुवृद्धौ ऋद्धोति तृपप्रीणङ्इत्येके क्षुभ्नादित्वात् णत्वं न तृप्नोति
छंदसि आगणांतादधिकारोयं अह व्याप्तौ अह्नोति दघ घातने पालने च द
घ्नोति चमु भक्षणे चम्नोति रि क्षि चिरि जिरि दाश दृ हिंसायां रिणोति क्षिणोति
अयंभाषायामित्येके नतपश्शाकटायनमतात् क्षिणोति ऋ॰ क्षीत्येके एवाजादिरि
त्यन्ये ऋ॰ क्षिणोति चिरिणोति जिरिणोति दाश्नोति दृणोति वृत् ३५ ॥
॥इति स्वादयः॥ ॥तुद व्यथने इतः षट् स्वरितेतः तुदादिभ्यः शः तुदति तुदते
तुतोद तुतोदिथ तुतुदे तोत्ता अतौत्सीत् णुद प्रेरणे नुदति नुनोद नुनुदे
नोत्ता दिश अतिसर्जने अतिसर्जनं दानं देष्टा दिक्षीष्ट अदिक्षत् अदिक्षत

सिं
८८

भ्रस्ज पाके ग्रहिज्या सस्य श्चुत्वेन शः शस्य जश्त्वेन जः भृज्जति भृज्जते भ्र
स्जो रोपधयोरमन्यतरस्यां भ्रस्जो रेफस्योपधायाश्च स्थाने रमागमो वा स्यादा
र्द्धधातुके मित्वादन्त्यादचः परः स्थानषष्ठीनिर्देशाद्रोपधयोर्निवृत्तिः बभर्ज
बभर्जतुः बभर्जिथ बभर्ष्ठ बभर्ज रमभावे बभ्रज्ज बभ्रज्जतुः बभ्रज्जिथ
स्कोरिति सलोपः व्रश्चेति षः बभ्रष्ठ बभ्रज्जी भर्ष्टा भर्क्ष्यति भ्रक्ष्यति क्ङिति
रमागमं बाधित्वा संप्रसारणं पूर्वविप्रतिषेधेन भृज्ज्यात् भृज्ज्यास्तां भ्रक्षीष्ट भ
र्क्षीष्ट अभार्क्षीत् अभ्राक्षीत् अभर्ष्ट क्षिप प्रेरणे क्षिपति क्षिपते क्षेप्ता
अक्षैप्सीत् अक्षिप्त कृष विलेखने कृषति कृषते क्रष्टा कर्ष्टा कृष्यात् कृ
क्षीष्ट स्पृशमृशकृषेति सिज्वा पक्षे क्सः सिच्यमवा अक्राक्षीत् अकार्क्षीत् अकृ

८८

क्षत् तङिलिङुःसिचाविति किस्वादन्न अहृक्ष अहृक्षत अहृक्षातां अहृक्षंत
ऋषीगतौ परस्मैपदि ऋषति आनर्ष जुषीप्रीतिसेवनयोः आत्मनेपदिनश्चे
तारः जुजुषे ओविजीभयचलनयोः प्रायेणायमुत्पूर्वः उद्विजते विजइट् विजे
विपरइडादिप्रत्ययोङिद्वत् उद्विजिता उद्विजिष्यते ओलजीव्रीडने
लजते लेजे लज्जते अथपरस्मैपदिनः ओव्रश्चुच्छेदने प्रजिह्विज्या वृश्च
ति वव्रश्च वव्रश्चिथ वव्रश्च लिघभ्यासस्योभयेषामितिसंप्रसारणं तस्याचः प
रस्मिन्नितिस्थानिवद्भावान्नसंप्रसारणइतिवसोलंन व्रश्चिता व्रष्टा व्रश्चिष्यति
वृश्च्यातिवृश्च्यात् अव्रश्चीत् अव्राश्चीत् व्यच्व्याजीकरणे विचति विव्याच
विविचतुः विविचुः व्यचिता व्यचिष्यति विच्यात् अव्याचीत् अव्यचीत् व्यचे

सिं ८

कुत्वाविखमनसीतितुनेहप्रवर्त्तते अनसीतिपर्युदासात्हलन्माविषयत्वात् उछि उंछे उछविवासे ऋछगतीप्रलयमूर्त्तिभावेषु ऋछत्यतामितिगुणः द्विहल्ग्रहणास्याने कहलपलक्षणत्वान्नुट् आनर्छ आनर्छतुः छिता मिछ उत्क्लेशे उत्क्लेशपीडा मि मिछ अमिछत् जर्जचर्चझर्झ परिभाषणभर्त्सनयोः त्वचसंवरे तत्वाच ऋचस्तु तो आनर्च उज्झ आर्जवे उज्झत उत्सर्गे लुभविमोहने विमोहनमाकुलीकरण म् लुभति लोभिता लोब्धालोभिष्यति रिफकत्थनयुद्धनिंदाहिंसादनेषु रिफ ति रिहत्येके शिधुन्नपिग्रामंतिभीरिहतिं त्रपत्रफल्लफो आद्यः प्रथमांतः द्वि तीयोद्वितीयांतः द्वावपिद्वितीयांताविसन्ते त्रपति ततर्पततर्पिता स्टशाम्ब्शो सि ज्विकल्पः योषादिकस्यैव अत्रपदत्वात्तेनात्रनिसश्चिच् अतपीत् अतर्पिष्टां

८

शस्य अङि लावनिदितां विति नलोपः शेऌंफादीनां नुम्वाच्यः आदिशब्दप्रका
रे॥ तेनये ऽत्र नकारानुशक्तास्ते तृंफादयः तृंफति ततृंफ तृंफात् तुपतुं
प तुफ तुंफ हिंसायां तुपति तुतोप तुंफति दृप दृंफ उत्क्लेशे प्रथमः प्रथमां
तः द्वितीयः द्वितीयांत इत्येके द्वावपि द्वितीयांतावित्यन्ये दृपति दृंफति ऋ
फ ऋंफ हिंसार्थौ ऋफति आनर्फ ऋंफांचकार गुफ गुंफ ग्रंथे गुफति जुगो
फ गुंफति उभ उंभ पूरणे उभति उवोभ उंभांचकार शुभ शुंभ शोभार्थौ
शुभति शुंभति दृभी ग्रंथे दृभति चृती हिंसाग्रंथनयोः चर्त्तिता सेचेति
वेट् चर्त्तिष्यति चर्त्स्यति अचर्त्तीत् विध विधाने विधति वेधिता जु
ड गतौ तवर्गपंचमांतमेके जुडगतौ॥ ति मरुतो जुनति मृड सुखने

सि॰
८८

मडतिमर्डिता एडत्व एडति एणप्रीणने कणनिमणहिंसायांतुणकौटिल्ये पुणकर्मणिसुभे पुणाति मुणप्रतिज्ञाने कुनशब्दोपकारणयोः शुणगतौ द्रुणहिंसागतिकौटिल्येषु घुणघूर्णभ्रमणे षुरऐश्वर्यदीप्त्योः सुरति सु षोर् आशिषिसूयात् कुरशब्दे कुरति कूर्यात् अत्रनभकुर्छुरामितिनि षेधोन करोतेरेवतत्रग्रहणाविलासाद्धः खुरछेदने मुरसंवेष्टने क्षुरवि लेखने घुरभीमार्थशब्दयोः पुरअग्रगमने वृहउद्यमने॥दंत्योष्ठ्या दिः पवर्गीयाद्वितपरिरयने तृहूस्तृहूतृंहृहिंसार्थाः तृहति ततर्हस्तृ हति तस्तर्ह स्तर्हिता स्तृठअस्तृहीत् अतार्क्षीत् अतार्हीत् इ षइच्छायां इषगमीतिछः इच्छति एषिता एष्टा एषिष्यति इष्यात्

८८

रेषीत् मिष स्पर्द्धायां मिषति मेषिता किल श्वैत्यक्रीडनयोः तिल स्नेहे
चिल वसने चल विलसने इल स्वप्नक्षेपणयोः विल संवरणे दंत्योष्ठ्यादि
बिल भेदने ओष्ठ्यादि णिल गहने हिल भावकरणे शिल षिल उञ्छे मिल
श्लेषणे लिख अक्षरविन्यासे अलेखीत् कुट कौटिल्ये गाङ्कुटादिभ्य
इति ङित्वं चुकुटिथ चुकुट कुटिता कुटिष्यति अकुटीत् पुट संश्लेष
णे कुच संकोचने गुज शब्दे गुड रक्षायां डिप क्षेपे छुर छेदने न
भकुर्छुरामिति न दीर्घः छुर्यात् स्फुट विकसने पुस्फोट मुट आक्षेपप्र
मर्दनयोः त्रुट छेदने वाभ्राषेति श्यन्वा त्रुट्यति त्रुटति तुट कलह
कर्मणि तुटति तुटिता चुट छुट छेदने जुड बंधने कड मदे लुठ संश्ले

सि॰
९९

षणे हुड घनत्वे घनत्वंसांद्रता चकर्थ हुडिता कुडवास्ये पुडउत्सर्गे पुडप्रतिघाते तुडतोडने तोडनंभेदः थुडस्फुड संवरणे तुथोड पुस्फोट खुडक्षुड इत्येके स्फुर स्फुल संचलने अस्फुरीत् अस्फुलीत् स्फुरस्फुरणे स्फुरतिस्फुरसो निर्निर्विभ्यः षत्वंवास्यात् निष्फुरति निःस्फुरति स्फुरइत्सकारोपधकेचित्पठंति पस्फार स्फुडचुडब्रुड संवरणे कुड़मज्जनिमज्जन इत्येके गुरी उद्यमने अनुदात्तेत गुरते जुगुरे गुरिता गुल्लवने दीर्घन्तिः परिणुत गुणोदयः इतश्चत्वारः परस्मैपदिनः नुवति अनुवीत धूविधूननने धुवति गुपुरी षोत्सर्गे जुगुविथ गुता गुप्यति अगुषीत् हुस्वादंगात् अगुतां अगुषुः धुगतिस्थैर्ययोः धुवइ

९९

तियातरं आद्यस्य ध्रुवतीत्यादि गुवतिवत् द्वितीयस्तु सेट् दुध्रुविथ
ध्रुविष्यति ध्रूयात् अध्रुवीत् अध्रुविष्टां कूङ् शब्दे दीर्घांत इति कैय
ट्यः कुविता अकुविष्ट हुस्वांत इति न्यासकारः कुता अकुत ष्टत् कु
टबयोरुक्ताः पृङ् व्यायामे प्रायेण व्याङ्पूर्वः रिङ् इयङ् व्याप्रियते व्याप्रे
व्यापप्राते व्यापप्रिरे व्यापरिष्यते व्यापृत व्यापृषातां मृङ् प्राणत्यागे
म्रियते र्लुङ्लिङोश्च लुङ्लिङोः शितश्च प्रकृतिभूतान्मृङ् स्तङ् नान्य
त्र ङिलस्वरार्थे म्रियते ममार मम्रथु ममृव मर्ता मरिष्यति मृषी
ष्ट अमृत अथ पूरस्मै पदिनः रिपिगतौ अंतरगत्वादियङ् रियति रे
ता पियति पेता धिधारणे क्षिनिवासगत्योः षूप्रेरणे सुवति सवह दृ

अविक्षेपे किरति किरतः चकार चकरतुः करिता कीर्यात् किरतौ लवणे
उपात्किरतेः सुडागमः छेदे उपस्किरति अड्भ्यासव्यवायेपि सुट्कात्पूर्व इ
ति वक्तव्यं उपास्किरत् हिंसायां प्रतेश्च उपात्प्रतेश्च किरतेः सुट् स्यात्
हिंसायां उपस्किरति प्रतिस्किरति गॄ निगरणे अचि विभाषा गिरतेः
रेफस्य लत्वं वा स्यादजातौ गिरति जगार जगाल जगरिथ जगलिथ ग
रिता गरीता गलिता गलीता दृङ् आदरे आद्रियते आदद्रे आदद्रि
षे आदर्त्ता आदरिष्यते आदृषीष्ट आदृषातां धृङ् अवस्थाने ध्रियते
अथ परस्मैपदिनः षोडश प्रछ ज्ञीप्सायां पृच्छति पप्रच्छ पप्रच्छतु पप्र
च्छिथ पप्रष्ठ प्रष्टा प्रक्ष्यति अप्राक्षीत् वृत् किरादयो वृत्ता सृज वि

सर्गे विभाषासृजदृशोः ससर्जिथ सस्रष्ठ स्रक्ष्यति सृजदृशोरित्यमागमः
सृजेत् सृज्यात् असृाक्षीत् टुमस्जोशुद्धौ मज्जति ममज्ज मज्जिन
शोरित्यतिनुम् मस्जेरंत्यात्पूर्वोनुमवाच्यः संयोगादिलोपः ममङ्क्थ
मङ्क्ता मंक्ष्यति अमांक्षीत् अमाङ्क्तां अमाङ्क्षुः रुजोभंगे रोक्ता
रोक्ष्यतिअरौक्षीत् अरौक्तां भुजोकौटिल्ये रुजवत् छिपस्पर्शे छेत्ता
अछैक्षीत् रुशरिशहिंसायां तालव्यांतौ रोष्टा रोक्ष्यति लिशगतौ अलि
क्षत् स्पृशसंस्पर्शे स्प्रष्टा स्प्रक्ष्यति अस्प्राक्षीत अस्पृक्षत् विच्छगतौ
गुपधूपविच्छपणिपनिभ्यआयः विच्छायति विच्छायांचकार विविच्छ विशप्र
वेशने विशति वेष्टा मृशआमर्षणे आमर्षणंस्पर्शः अम्राक्षीत् अ

सि॰
८१

न्यक्षीत् अम्यक्षत् णुद्प्रेरणे कर्त्र्यभिप्रायेपिफलेपरस्मैपदार्थंपुनःपाठः
षद्लृविसरणगत्यवसादनेषु सीदतीत्याविभौवादिकवत् इहपाठेनुम्वि
कल्पार्थः सीदति सीदंति ज्वलादिपाठस्तुणार्थस्सदः स्वरार्थश्च शदेनु
दात्तेतः सत्वद्यात्तः शद्लृशातने स्वरार्थएवपुनःपाठः शातानुनास्ति शदे
शिलङ्इत्यात्मनेपदोक्तेः अथषड्स्वरितेतः मिल्संगमे मिलसंश्लेष
णइत्यस्य पुनःपाठः कर्त्रभिप्रायेतङर्थः मिलति मिलते मिमेलेमि
मिले मुच्लृमोक्षणे शेमुचादीनां नुमस्यात् मुंचति मुंचते मोक्ता
मुच्यात् अमुक्षीष्ट अमुचत् अमुक्त अमुक्षाताम् लुप्लृछेदने
लुम्पति लुंपते अलुप्त विद्लृलाभे विंदति विंदते विवेद व्याघ्र

८१

भूतादिमतेसेट्कोयं वेदिता भाष्यमतेनिट्कः परिवेत्ता परिवर्जनेज्येष्ठंपरित्य
ज्यदाराग्नीलब्धवानित्यर्थः स्वतन्त्रो लिपउपदेहे उपदेहोवृद्धिः लिंपति लिं
पते लेप्ता लिपिसिचोस्तङ्तङितुवा अलिपत् अलिप्त अलिपत सिचक्षर
णे सिंचति सिंचते असिचत् असिक्त अभिसिंचति अभिसिषेच अथत्र
यःपरस्मैपदिनः कृतीछेदने कृंतति चकर्त्त कर्त्तिता कर्त्तिष्यति कृत्स्यति अ
अकर्तीत् खिदपरिघाते खिंदति चिखेद खेत्ता अयंदैन्येदिवादौरुधादौच
पिशअवयवे पिंशति पेशिता अयंदीपनायामपि त्वष्टारूपाणिपिंशतु ६१ इ
तिमुचादयस्तुदादयश्च रुधिरआवरणे नवस्वरितेतरित्यश्च रुधादिभ्यःश्नम
शयोपवादः मित्वादन्त्यादचःपरः निसत्वाकुणत्वाधते रुणद्धि श्नसोरल्लोपः
१८

सिं॰
८२

णत्वस्यासिद्धत्वादनुस्वारः परसवर्णः तस्यासिद्धत्वान्नत्वन्न नपदांतेतिसूत्रेणानु
स्वारःपरसवर्णयोरल्लोपोनस्थानिवत् रुधः रुंधे रोत्स्यति रोत्स्यते रुणद्धु रुंधा
त् रुंधि रुणधानि रुणधै अरुणत् अरुंधां अरुंधन् अरुणत् अरुणः अ
रुणधं अरुधत् अरौत्सीत् अरुद्ध भिदिर विदारणे भिनत्ति भिंते भेत्स्य
ति भेत्स्यते अभिनत् अभिनद् अभिदत् अभैत्सीत् अभित् छिदिर् द्वै
धीकरणे अच्छिदत् अच्छैत्सीत् अच्छित रिचिर विरेचने रिनक्ति रिंक्ते रि
रेक्तु रेक्ता अरिणक् अरिचत् अरैक्षीत् अरिक्त विचिर पृथग्भावे वि
नक्ति विङ्क्ते क्षुदिर संपेषणे क्षुनत्ति क्षुंत्ते क्षोत्ता अक्षुदत् अक्षौत्सीत्
अक्षुत युजिर योगे योक्ता उच्छृदिर् दीप्ति देवनयोः छनत्ति छंत्ते चच्छर्दे

८२

सेसिच्चीतिवेट् चच्छृदीप्ते चच्छृत्से छर्दिता छर्दिष्यति छर्त्स्यति अच्छृदत् अच्छर्दी
त् अच्छृर्दिष्ट उतृदिर् हिंसानादरयोः ४८ छृतिवत् तृतीछेदने परस्मैपदी तृणत्ति
आर्द्धधातुके तौदादिकवत् ञिइंधीदीप्तौ त्रयआत्मनेपदिनः श्नान्नलोपः श्नमः प
रस्यनस्यलोपःस्यात् श्नसोरल्लोपः इन्धे इंत्से इंधिता इनधे ऐंध ऐंधाः खिददै
न्ये खिंत्ते खेत्ता विद्विचारणे वेत्ता अथपरस्मैपदिनः शिष्लृविषेशणने शिनष्टि शिं
ष्टः शिंषंति शिशेषिथ शेष्टा हेर्धिः जस्त्वं ष्टुत्वम्रोलोरीतिणालोपः अनुस्वारपरस
वर्णौ शिशिंढ शिनषाणि अशिनट् ल्रदित्वादङ् अशिषत् पिष्लृसंचूर्णने शिषिव
त् भंजोआमर्दने भनक्ति बभंजिथ बभंक्थ भङ्क्ता भुजपालनाभ्यवहारयोः भुन
क्ति भोक्ता भोक्ष्यति अभुनक् तृहहिसिहिंसिहिंसायां तृणहइम् तृहः श्नमिहते

सि॰
८४

इमागमस्याद्धलादौ पिपति हणोढि हणढः ततर्ह ततर्हिथ अहणेढ् हिनस्ति जि हिंस हिंसिताउदीत्के दनेज्जनस्ति उंत्तः उंदांचकार औंतां औंदत् औनः औनतऔ नदं॥ अंजूव्यक्तिम्रक्षकांतिगतिषु अनक्ति अंक्तः अंजंति आनंज आनंजिथआ नङ्क्थ अङ्क्ता अंजिता अंग्धि अनिजानि अनाक् अंजसिच्चि अंजेसिचो नित्यमिट् स्यात् आंजित् तंचूसंकोचने तनक्ति तङ्क्तातंचिता ओविजीभयच लनयोः विनक्ति विंक्तः विजइ डितिलित्तं विविजिथ विजिता अविनक् अवि जित् वृजीवर्जने वृनक्ति वर्जिता पृचीसंपर्के पृणक्ति पपर्चइतिरुधादयः अ थसहस्वरितेतः तनुविस्तारे तनूदिहस्भ्यः तनोति तन्वः तनुवःतनुते तता न तेने तनु अतनीत् अतनीत् तनादिभ्यस्तथासोः तनादेःसिचोलुग्वास्यात्तथा

८४

सोः थासमाहचर्यादेकवचनांतशब्दाग्रहस्यते तेनेह न पूयमतिनिष्ठः षणु दा
ने सनोति सनुते येविभाषा सायात् सन्यात् जनसनेसात्वं असात् असनि
ष्ट असाथाः असनिष्ठाः क्षणु हिंसायां क्षणोति क्षणुते ह्म्यंतेतिनवृद्धिः अक्ष
णीत् अक्षत अक्षनिष्ठाः अक्षथाः क्षिणुच उप्रत्ययनिमित्तेलघूपधगु
णः संज्ञापूर्वकोविधिरनित्य इतिनभवतीत्यात्रेयादयः भवत्येवेत्यन्ये क्षिणोति
क्षेणोति क्षिणितासे अक्षेणीत् अक्षित अक्षिणिष्ठ ऋणु गतौ ऋणोति अ
र्णोति अर्णुतः अर्णवीति आनर्ण आनृणे अर्णितासि आर्णित् आर्त्त आ
र्णिष्ट आर्थाः आर्णिष्ठाः तृणु अदने तृणोति तर्णोति तृणुते तर्णुते घृ
णु दीप्तौ जघर्ण जघृणे अथ यहावनुदात्तेत्तौ वनु याचने वनुते ववने चांद्रमते

सि॰ ८७

परस्मैपदिद्विनोति धवान मनुअववोधने डुकृञ्करणे करोति अतउत्सार्वधा
तुके कुरुतः यण नभकुर्छुरामितिनदीर्घः कुर्वंति निसंकरोतेः करोतेःप्रत्ययोका
रस्यनित्संलोपः स्याम्वोः म्योः कुर्वः कुर्मः चकर्थ कर्त्ता करिष्यति येच हलउ
लोपः स्याद्यादौ प्रत्ययेपरे कुर्यात् आशिषिक्रियात् हलीह अकार्षीत् तन्यादि
भ्यइतिलुक्ष्ो भावेहूस्वादंगादितिसिचोलोपः अकृत अकृथाः संपरिभ्यांकरोतौ
भूषणे समवायेच संपरिपूर्वस्यकत्तारोतेः सुट्स्याद्भूषणेसंघेचार्थे संस्करो
तिअलंकरोतीत्यर्थः संस्कुर्वंति संघीभवतीत्यर्थः संपूर्वस्यक्वचिदभूषणेपिसु
ट् संस्कृतंभक्षा इतिज्ञापकात् परिनिविभ्यइतिषत्वं परिष्करोति सिवादी
नांच पर्यष्काषीत् पर्यस्कार्षीत् उपात्प्रतियत्नवैकृतवाक्याध्याहारेषुच उ

८७

पात्स्त्रमः सुट् स्यादेष्वर्थेषु चात्प्रागुक्तयोरर्थयोः प्रतियत्नो गुणाधानं विकृतमेव वै
कृतं विकारः उवाक्याध्याहार आकांक्षितैकदेशपूरणं उपस्कृता कन्या अलंकृता
इत्यर्थः उपस्कृता ब्राह्मणाः समुदिता इत्यर्थः एधोदकस्योपस्कुरुते गुणाधानं क
रोतीत्यर्थः उपस्कृतं भुंक्ते विकृतमित्यर्थः उपस्कृतं कुरुते वाक्याध्याहारेणेत्यर्थः
सुट्कात्पूर्व अडभ्यासव्यवायेपि सुट्कं संचस्कार कात्पूर्व इत्यादिभाष्ये प्रत्या
ख्यातं तथाहि पूर्वं धातुरुपसर्गेण युज्यते अंतरंगत्वात्सुट् ततो द्वित्वं ए
वं च तत्र ऋतश्च संयोगादेर्गुणः संचस्करतुः हस्वात् स्त्रे ऋतो भारद्वाजस्येति सू
त्रे च हलो सुट् इति वक्तव्यम् तेन च सुट्कात्परस्येट् संचस्करिथ संचस्करिव
गुणोर्त्तीति सूत्रे नित्यं छंदसीति सूत्रान्नित्यमनुवर्त्तते नित्यंपः संयोगादेस्तस्येत्य

सिं
९५

र्यात्सुटिगुणेन संक्रियात् ऋतश्चसंयोगादेरितिलिङिसिचोर्नेट् एकाच्उ
पदेश इतिसूत्रादुपदेशइत्यनुवर्त्यउपदेशेयःसंयोगादिरितिव्याख्यानामत्।
सस्कृषीष्ट। समस्कृत। समस्कृषातां इतितनादयः॥ डुक्रीञ् द्रव्यविनिमये निर्कारिष्य
श्नाक्री णाति ई हल्यघोः क्रीणीतः ईलोपः श्वर्ध्देरे तादेशः परत्वान्नित्यत्वादंतरंगत्वा
एवं ह्रस्वाभावः। ततः स्नाभ्यस्तयोरित्यालोपः क्रीणंति। क्रीणीते। क्रीणते। निक्र्यायः।
चिक्रियतुः। चिक्रयिथ। चिक्रियिव। चिक्रिपिवेप्यौ। क्रेता। क्रेष्यति। क्रीयात्। क्रेषीष्ट
। अक्रैषीत्। अक्रेष्ट। प्रीञ् तर्पणे। कांतौ च। कातिः कामना। प्रीणाति। श्रीञ् पाके। मीञ्
हिंसायाम्। हिनुमीना प्रमाणाति। प्रमीणीत। मीनाति। मिनोति। से ज्विषये श्नात्वं। ममौ
। मिम्यतुः। मिमिथ ममाथ। मिमेतामताव्यति। मीयात्। मासीष्ट। अमासीत्। अमासिष्टां

९५

अमाष्टस्त। षिञ् बन्धने। सिनाति। सीनीते। सिषाय। सिष्ये। सेता। स्कुञ् आप्रव
णे। स्तम्भु स्तुंभु स्कंभु स्कुंभु स्कुञ्भ्य श्नुश्च। चात् श्ना। स्कुनोति। स्कुनुते। स्कु
नाति। स्कुनीते। चुस्काव। चुस्कुवे। स्कोता। अस्कौषीत्। अस्कोष्ट। स्तम्भ्वाद्यश्चत्वा
रः सौत्राः सर्वे रोधनार्थ इत्येके। माधवस्तु स्तम्भिस्तुम्भी रोधनार्थौ। तृतीयो निष्को
षणार्थश्चतुर्थो धारणार्थ इत्याह। सर्वे परस्मैपदिनः। नलोपः। विष्टभ्नोति।
विष्टभ्नाति। व्यष्टभत्। व्यष्टम्भीत्। स्तभ्नोति। वेः स्कभ्नातेर्नित्यम्। वेः परस्य स्कभ्ना
तेर्नित्यं षत्वं स्यात्। स्कुभ्नोति। हलः श्नः शानज्झौ। हलः परस्य श्नः शानजादेशः स्या
द्धौ। स्तभान। स्कभान। स्कुभान। पक्षे स्तम्भुहि इत्यादि। युञ् बन्धने। युनाति। युनी
ते। योता। क्नूञ् शब्दे। क्नूनाति। क्नूनीते। पक्षे क्नविता। दॄञ् हिंसायां। दृणाति। दॄ

सिं
५८

णीते। हृणीते। ष्ट्र बन्धने। ब्वारीनां ङ्क स्तः। श्रितिपरे। पुनाति॰नीते। पविता। लूञ्
छेदने। लुनाति। लुनीते। स्तॄञ् आछादने। स्तृणाति। स्तृणीते। तस्तार। तस्त
रतुः। स्तरिता। स्तरीता। स्तृणीयात्। स्तृणात। आशिषि स्तियाते लुङ् सिचो रि
त्विवेट्। न लिङि। स्तरिषीष्ट। उश्चेति कित्वा। स्तीर्षीष्ट। सिचि च परस्मैपदे न दीर्घः।
अस्तारीत्। अस्तारिष्ट्यं अस्तारिष्ट। अस्तीर्ष्ट। कॄञ् हिंसायां। कृणोति। कृणी
ते। रकारः रकारे। वृञ् वरणे। वृणाति। वृणीते। वनाशर्वरिभा। आशिषि। उदोष
थ्यपूर्वस्य। वूर्यात्। वरिषीष्ट। वूर्षीष्ट। अवारीत्। अवारिष्टां। अवरिष्ट। अ
वरीष्ट। अवूर्षीष्ट। धूञ् कंपने। धुनाति। धुनीते। दुधविथ। दुधोथ। धविता। स्त
कधूञभ्यइतीट्। अधावीत्। अधविष्ट। अधोष्ट। अथवधात्संतार स्पै

५८

पदिनः। शॄ हिंसायां। शॄदॄप्रां ह्रस्वो वेति ह्रस्वपक्षे यण्। अन्यादेश आच्छत्व ताम्
मितिगुणः। शश्रतुः। शशरतुः। श्रुकः किति निषेधस्य क्रादिनियमेन बाधः। शश
रिव। शश्रिव। शरिता। शरीता। शृणाति। हिंशीर्यात्। अशारिष्ट। पॄ पालन
पूरणयोः। पप्रतुः। आशिषि पूर्यात्। वॄ वरणे। भरणे इत्येके। भॄ भर्त्सने भरणे
ऽप्येके। मॄ हिंसायां। मृणाति। ममारः। दॄ विदारणे। ददरः। ददृतुः। जॄ वयोहा
नौ। झॄ इत्येके। धॄ इत्यन्ये। नॄ नये। कॄ हिंसायां। ऋ गतौ। ऋणाति। अचार।
अरिता। अरीता। आरणीत्। आरणीतां। ईर्यात्। आरीत्। अ आती ज्यां वयो
हानौ। ग्रहिज्या हल। अंगावयवाद्धलः परं यत्सम्प्रसारणं तदंभागस्य दी
र्घः स्यात्। इति दीर्घे हल ते। धातोनां हूस्वः। जिनाति। जिज्यौ। जिज्यतुः। रीग

सि॰ ८७

तिरेषणायोः। रेषणं कशब्दः। ली श्लेषणे। विभाषा लीयतेरिस्यते। विषयेऽत्रालंबा
।लतो। लीलाय। लाता। लेता। ह्लीकरणे। क्लिनाति। लीगतोवृत्॥ स्वादयोष्ठताः।
घादयो पी स्येके। कीवरणे। श्री भये। भरणइत्येके। क्षाष हिंसा यां। एषान्त्रयाणां
क्रस्वः॥ केचिन्मते तु नश्च। अवबोधने। ज्ञा जनाजी। जानाति। दीर्घनिर्देश
सामर्थ्यान्नह्रस्वः। बन्ध बन्धने। बध्नाति। बबन्धिथ। बबंध। बंधारो। भंत्स्यति।
बधान। अभांत्सी द्वंद्वाम्। सिद्धमिति भाष्यावः। वारू वंहिसि ज्योयः। प्रत्यल
क्षणेन सावि प्रत्ययमाश्रित्य भष्भावेन। प्रत्ययलक्षणं दीति सिज्लोपस्या
सिद्धत्वात्। अपाध्या। अभांत्सुः। उत्तमे। क्री वृणीते। अवे। वक्षणे। वव्रे। व
रिता। वरीता। अवरिष्ट। अवरीष्ट॥ अवृत। श्रंथ विमोचन प्रतिहर्षयोः। इ

८७

तःपरस्मैपदिनः।श्रथ धातौ।श्रंथ ग्रंथैसादिनाकित्वपक्षे एत्वाभ्यासलोपाव
प्यत्रवक्तव्या।विवहरति हरदत्तादयः।श्रेथतुः।श्रेथुः।श।श्रंथिथ।इदं किलं
पितामपि इति सुधाकर मते।श्रेथिथ।श्रस्मिन्पक्षे णलिशिश्राय।उत्तमे तु
शश्राथ।श्रश्रथेति माधवः।तत्रमूलं मृग्यम्।मंथ विलोडने।श्रंथ ग्रंथ सद
र्भे।श्रर्थभेदात् श्रंथेः पुनः पाठः।रूपं तूक्तं।कुंथ श्लेषणे संक्लेशे इत्येके।क
न्त्याच्चकुंथ।ऊथेति दुर्गः।चुकोथ।मृद क्षोदे।मृद्नाति।मृडचां।श्रव सुखे।
पि।मृडुत्वम्।मृडणाति।।गुध रोषे।गुध्नाति।कुश याने।कशाषी।कुश्नाति।कोषिता
।निरकुषः।।निरः परात्कषः।बलादेराद्वितु कस्येड्वा स्यात् निष्कोषिता।निष्को
ष्टा।निरजक्षत।क्षुभ संचलने।क्षुभ्नाति।क्षुभ्नादिषु च।क्षुभ्नीतः क्षोभि

ता। क्षुभान। णभ तुभ हिंसायां। नभ्नाति। तुभ्नाति। नभते तुभत इति शपि। नभ्यति
। तुभ्यति। इति श्यनि। क्लिश विबाधने। शात्। इति श्नलनिषेधः। क्लिश्नाति। क्ले
शिता। क्लेष्टा। अक्लेशीत। अक्लिक्षत। अश भोजने। अश्नाति। आश। उध्रस उं
छे उकार इत्। ध्रस्नाति। उकारो धात्ववयव इत्येके। उध्रसांचकार। इष आभी
क्ष्ण्ये। पौनःपुन्यं भृशार्थो वाभीक्ष्ण्यं। इष्णाति। एषिता। तीक्ष्णसहेत्यत्र सहिनासा
हचर्यादिकारविरणस्यतौदादिकस्यैव इषग्रहणं न तु इष्यतेः। ह्नातोरित्याकुः
षस्कतस्तिङ इष्णातेरपि इच्छिकल्पउन्विसः। तथा च भट्टिकमः इषेस्तकारे भन्त्र
स्य यत्प्रतिषेध इति। विष विप्रयोगे। विष्णाति। वेष्टा। प्रुष प्लुष स्नेहनसेचनपूरणे
पु। प्रुष्णाति। प्लुष्णाति। पुष पुष्टौ। पोषिता। मुष स्तेये। मुष्णाति। मोषिता। खच भू

तस्मात्तुभवे। भूतप्रादुर्भावोऽतिक्रान्तोऽसतिः। खनकाति॥ वान्तोयमित्येके। छोभू
उनुनासिके च। सुतुकस्य च्छस्यवस्य चक्रमात् च्छ रुन्लावादेशोस्तो उनासिके
क्वौन्लादौ ङि तिन्वा। खोनाती च खाव। खवित। शा नन्वः। परस्मात् ठि हलतेर्हि
लंलबाभावान्नशान्त। खोनी हि। हिंठ बाहेऽशाति। प्रहउपदातो स्वरितेत। प्र
हि ग्रध्या॥ ग्रहगतिग्र क्रीते। ग्रहो वि विदीर्घः। एकाचो ग्रहे विहितस्येटो दीर्घः स्या
न्न तु लिटि। ग्रहीता। लिटि तु जग्रहिव्या ग्रण्यात्। ग्रणीषीष्ट। हल्मतो निवृद्धि
।अग्रहीत्। अग्रहीष्टा आग्रहीष्टातां। ध्र इति क्र्यादिः। अथ चुरादिः॥ चुर
स्तेये। तसापयारास पवी णात लक्ष्मोक्षसेनालोमत्वचवषभर्वर्णचूर्णादिभ्यो
णिच्। एभ्यो णिच् स्यात्। चूर्णातिभ्यः प्रातिपदिकाद्धात्वर्थे ग्रहणं प्रपंचार्थं।

सि॰
९९

चुरादिभ्यस्तु स्वार्थे। णुंगंतेति गुणः। सना घंता इति धातुत्वं। तिपशपावादिगुण
यादेशौ। चोरयति। णिचश्च। णिजंतादात्मनेपदं स्यात्कर्तृगामिनि क्रियाफ
ले। चोरयते। चोरयिता। चोरयतु। चोरयिष्ट॥ णिश्रीति चङ्। णौ चङीति ह्र
स्वः। राद्दिलम्। हलादिशेषः। दीर्घो लघोरित्याभ्यासदीर्घः। अचुचुरत्। चिति
स्मृत्याम्। चिंतयति। अचिचिंतत्। चिंतेतिपठितव्ये इदित्करणं णिचः या
च्छिकत्वे। लिङ्गा तेन चिंतेइत्यादौ न लोपो न। चिंतति। निंतेत्। एतच्च ज्ञाप
कं समान्यापेक्षमिह तिलयत्रकच्चित्तिष्ठताजगुणातुः। जगणिरित्युदाहतला
त्। विशेषापेक्षमित्यपरो अतएवाष्टधा व्यस्यनवृतत्थ्यमिति। यत्रि संको
चे। यंत्रयति। यंतपठित्वा रांकयम्। यच्छुयदित्करणा घंत्रती तिमाधवनो

९९

कश्चित्यम्नाएवक्तुद्रितत्रिमात्रिषुस्फुडियरिहासे।स्फुरायति।इतिस्फुरणात्स्फुरणति।स्फुडी
तिपाठान्तरं।स्फुंडयति।स्फुंडति।लक्षदर्शनांकनयोः।कुडि अनृतभाषणे।कुंडयति।लड
उपसेवायां।लाडयति।मदस्नेहने।मिदयसि।मिंदति।ओलडि उत्क्षेपणे।ओलंडयति।
ओलंडति।ओकारइत्येके।लंडयति।लंडति।उकारादिरयमित्यन्ये।ओलडि इत्येके।पील अवगाहने।पीलयति।भाज भासभाषदीपजीवमीलपीडामन्यतरस्यां।
जषामुपधाया ह्रस्वो वास्या च्छङि परे णौ।अपीपिडत्।अपीडत्।नट अवस्यंदने।अव
स्यंदननाघां।श्रथ यत्ने।प्रथानइत्येके।अतिह पडिति वहवः।वध संयमने।बाधयति।
वंधेतिचांद्रः।पूरी पूरणे।दीर्घोच्चारणाणिचः।याक्षिकवंतिगानद्धिसेद्गृकत्वाय।एवंच पूर
णात्पिपति।भ्यांपरितेत्यादिसिद्धंषपिपर्ति।पूर्ण इत्यादिसिद्धिः।फलं।पारयति।गुर्ज

सि·
१००

वल्गप्राणनयोः। पक्ष परिग्रह इत्येके। वर्ण चूर्ण प्रेरणे। वर्ण वर्णन इत्येके। प्रथ प्रख्याने। प्रा
थयति। नान्येमितोऽहेताविति। वक्षिमानत्वान्नास्य मित्वं। अतस्त्वद्त्वर प्रथ म्त प्रख्या
ने। प्राथयति। नान्येमितोऽहेताविति। वक्षिमानत्वान्नास्य मित्वं। अतस्त्वद्त्वर प्रथ
म्नद् स्तृ स्पर्शे। एषामभ्यासस्य आकारोऽन्तादेशः स्यात्। चङ्परे णौ इत्यपवादः। अ
पप्रथत्। पृथ प्रक्षेपे। पर्थयति। उर्ऋत्। उपधाया ऋवर्णस्य स्थाने ऋत्स्यात् णौ चङ्प
रे णौ इत्येऽरीऽऽराम ऽपवादः। अपीपृथत्। अपपर्थत्। पथ इत्येके। पाथयति। षम्ब स
म्बन्धने। सम्बयति। अससम्बत्। शम्ब च। अशशम्बत्। साम्ब इत्येके। भक्ष अदने। कु
ट्ट छेदने भर्त्सनयोः। पूरण इत्येके। कुट्टयति। पुट्ट चुट्ट अल्पीभावे। अट्ट पुट्ट अनादरे।
अट्टयति। लोपधोयं। क्षुत्वस्यासिद्धत्वान्न ङ्राइति निषेधः। आट्टिट्टत्। लुण्ठ स्तेये।

१००

लुण्ठयति। लुण्टतीति लुटि स्तेय इति भौवादिकस्य शाठ श्वठ असंस्कारगत्योः। श्वठि इत्येके। तु
जि पिजि हिंसाबलादाननिकेतनेषु। तुंजयति। पिंजयति। इति दित्करणात्। तुंजति। पिंजति।
तुजि पिजि इति केचित्। लजि लुजि इत्येके। पिस गतौ। पेसयति। पेसतीति तु शपि गतं। षांत्वसाम
प्रयोगे। श्वल्क वल्क परिभाषणे॥ ष्णिह स्नेहने। स्फिट इत्येके। स्मिट अनादरे। असोपदेशत्वा
त्कषः। असिस्मिठत्। स्मिङ् अनादर इत्येके। ङित्वस्यावयवेऽचरितार्थत्वाण्णिजंतात्तङ्।
स्मापयते। श्लिष श्लेषणे। पथि गतौ। पंथयति। पंथति। पिच्छ कुट्टने। छदि संवरणे। छदयति।
श्राण दाने। प्रायेणायं विपूर्वः। कवि श्राणयति। तड आघाते। ताडति। खड खडि कडि भेदने।
खाडयति। खाडति। कण्डयति। खडति। कण्डति। कुडि रक्षणे॥ गुडि वेष्टने॥ रक्षण इत्येके।

कुठिइत्यन्ये। अवकुण्ठयति। कुण्ठति। गुठिइत्यपरे। खुडिखण्डने। वटिविभाजने। वडिइ
त्येके। मडिभूषायांहर्षे च। भडिकल्याने। छर्दवमने। पुस्तंवुस्तआदरानादरयोः। चुदसंचो
दने। नक्कधक्कनाशने। णोपदेशलक्षणोपर्युदस्तोयम्। अनक्कयति। चक्कचुक्कव्यथ
ने। क्षलशौचकर्मणि। तलप्रतिष्ठायाम्। तुलउन्माने। तोलयति। अलूतुलत्। कथं
तुलयतितुलनाइत्यादि। अतुलोपमाभ्यामितिनिपातनादङ्न्तस्यतुलाशब्दस्य
सिद्धौ। ततोणिच्। दुलउत्क्षेपणे। पुलमहत्वे। चुलसमुच्छ्राये। मूलरोहणे। कलवि
लक्षेपे। विलभेदने। तिलस्नेहने। चलभृतौ। पालरक्षणे। दीर्घोपधपाठसामर्थ्याणि
च्पोक्षिकः। लूषहिंसायाम्। शुल्बमाने। शूर्पच। चुटछेदने। मुटसंचूर्णने॥ पडिप
सिनाशने। पण्डयति। पण्डति। पंसयति। पंसति। वजमार्गसंस्कारगत्योः। शुल्कअति

स्पर्द्धने। चपि गत्याम्। चंपयति। चंपति। क्षपि क्षान्त्याम्। क्षंपयति। क्षंपति। छजि कृच्छ्र
जीवने। चपि गत्याम्। चंपयति। चंपति। छपि क्लान्त्याम्। छंपयति। छंपति। छंजि कृ
च्छ्रजीवने। श्वर्त्त गत्याम्। श्वभ्र च। ज्ञप मिच्च। अयं ज्ञापने ज्ञाने च। वर्त्तते। मितां ह्रस्वः
॥ मितामुपधाया ह्रस्वः स्यात् णौ परे। ज्ञपयति। यम च परिवेषणे। चान्मित्। परिवेषण
मिह वेष्टनम्। न तु भोजनम्। नापि वेष्टना। यमयति चन्द्रम्। परिवेष्टित इत्यर्थः। च
ह परिकल्कने। चहयति। अचीचहत्। कथादेर्वक्ष्यमाणस्यत्वाऽदन्तत्वेनाऽग्लोपित्वा
द्दीर्घसन्वद्भावो न। अचचहत्। चप इत्येके। चप इत्येकेति। रह त्यागे इत्येके। अरीर
हत्। कथादेस्तु अररहत्। बल प्राणने। बलयति। चिञ् चयने। विस्फुरणे। आत्वं वास्या
त् प्रणिचयति। प्रनिचयति। नान्ये मितोऽहेतौ। अहेतौ स्वार्थे णिच् ज्ञपादिभ्योऽन्ये मि

सि० २०२

तोनस्युः।तेनसमादीनाममंतात्वप्रयुक्तंमिस्वंन।वट चलने।मुस्तसंघाते।अस्तइत्येके।
खट्टसंवरणे।षट्टस्फिट्टचुबिहिंसायाम्।पूलसंघाते।पूणइत्येके।पुणइत्यन्ये।पुंसअभि
वर्द्धने।टकिबन्धने।टङ्कति।टक इति।धूसकांतिकरणे।धूसयति।दन्त्यान्तः।मूर्धन्यां
तइत्येके।भालव्यान्तइत्यपरे।कीटवर्णे।चूर्णसंकोचने।पूजायां।अर्कस्तवने।आवि
कृत।तपनइत्येके।शुठआलस्ये।शुठिशोषणे।गजमार्जशब्दार्थौ।गाजयति।मार्ज
यति।मर्च्चच।मर्चयति।घृप्रस्रवणे।स्रावणेइत्येके।विस्तारवचने।पंचयति।पंचइति
व्यक्तार्थस्यत्रापिगतं।तिजनिशाने।तेजयति।कृतसंशब्दने।उपधायाश्च।धातोरुप
धाभूतस्यऋतइत्स्यात्।उरण्रपरः।उपधायांचेतिदीर्घः।कीर्तयति।उअंत।अचा
कृतत्।अचकीर्तत्।वर्द्धछेदनपूरणयोः।कुबिआच्छादने।कुंबयति।कुंबति।कुभि

इत्येके। त्वुवितु वि अर्द्दने। अर्दन इत्येके। ह्लुयव्यक्ता। चिल्लपे इत्येके। चुवि छेदने। इल प्रेर
णे। एलयति। एलिलत्। माछ म्लेछने। म्लेछ अव्यक्तायां वाचि। ब्रूस बर्हि हिंसायां। केचिदिह ग
र्ज गर्द शब्दे। गर्ध अभिकांक्षायाम् इतिपठंति॥ गुद पुर्व निकेतने। जमि रक्षणे। गोक्षण इतिके
चित्। जंभयति। जंभति। ईडि स्तुतौ। जसु हिंसायां। पिडि संघाते। सष रोषे। सट इत्येके। डिप क्षे
पे। ष्टुप समुच्छ्राये। आकुस्मादात्मनेपदिनः॥ कुनाम्नो वेति वक्ष्यते। तभव्यायेत्यर्थः। अस्त
गामिफ्। चेतये। लार्थीमिदं तु। १ चित संचेतने ति। ने। १ दंशायजे १॥ अची वितत। दशि दंशा
दंदंश। ड दिला निम्नावे। दंशाति। आकुस्मीयमात्मनेपदं निवृत्तं संयोगे नैवेति व्याख्यातारः॥ न
लोपे संजिसा हल्वर्याङ्ग्वादेरेव ग्रहणं। दसि दर्शन दंशनयोः। दंशयतेः। दंशाति। दश इत्येके। डप
डिप संघाते। तत्र कुटुम्ब धारणे। तत्रयतो चांद्राः धातुद्वयं मत्वा कुटुम्बय इत्युदाहरंति।

सि॰
२०३

मन्त्रिगुप्तपरिभाषणे। स्पश ग्रहणसंश्लेषणयोः। तर्जभर्त्सतर्जने। वस्तगन्धअर्दने। वस्तय
ते। गन्धयते। विष्क हिंसायां। हिष्क इत्येके। निष्क परिमाणे। लत ईप्सायां। कण संकोचने
। तूण पूरणे। भ्रूण आशाविशंकयोः। शठ श्लाघायां। यक्ष पूजायां। स्यम वितर्के। गूर उद्यम
ने। शम लक्ष आलोचने। नान्ये मितोऽहे। जा वि ति मित निषेधः। शामयते। कुत्स अवक्षेप
णे। त्रुट छेदने। कुट्ट इत्येक। गल स्रवणे। भल आभंडने। कूट आप्रदाने। अवसादन इत्ये
के। कुट्ट प्रतापने। वंचु प्रलंभने। वृष शक्तिबंधने। शक्तिबंधनं प्रजननसामर्थ्यं। शक्ति
बंध आवर्षयते। मद तृप्तियोगे। दिवु परिकूजने। ग विज्ञाने। गारयते। विद चेतनाख्यानंनि
वासेषु। वेदयते। सत्तायां विद्यते। ज्ञाने वेत्ति। विते विंदति प्राप्तोस्यन्तुक भ्रंशो ष्विदं क्ष्मात्।
मनस्तंभे। मानयते। युजु गुप्सायां। यावयते। कुस्म नाम्नो वा। कुस्मेति धातु। कुत्सितस्मय

२०३

नेवर्त्तीते। ऊरमयते। अच्छुऊस्मत। अथवाऊस्मेति प्रातिपदिकं ततो धात्वर्थे णिच्।
इत्याऊस्मीयाः। चर्वअध्ययने। वुक्कभाषणे। शब्दउपसर्गादाविष्कारेच। चाद्भाषणे। प्रे
तिशब्दयति। कणनिमीलने। काणयति। णौच्चङ्युपधाया ह्रस्वः। काणयादीनां वेतिविक
ल्पते। अचीकणत्। अकाणत्। जभिनाशने। जंभयति। जंभति। क्षुद्र क्षरणे। क्षुदयति।
अचुक्षुदत्। जसुताडने। जासयति। जसति। पशवन्धने। पाशयति। अमरोगे। आमय
ति। नान्येमितिइतिनिषेधः। अमगत्यादेश्वापिगतः। तस्माद्धेतुमण्णौ। आमयति। चट्स्फु
टभेदने। विकसनेशब्दयोः। स्फुटति। स्फोटतइतिइतिउक्तं। घट्संघाते। घाटयति। हन्त्य
र्थाश्च। नवगण्यामुक्ता अपिहंत्यर्थाः स्वार्थेणिचंलभन्ते इत्यर्थः। दिवुमर्दने। उद्दिवा
द्देवतीत्यपि। अर्जप्रतिवत्नोऽपयमर्थान्तरेऽपि। द्रव्यमर्जयति। घुषिविशब्दने। घोष

यति। घुषिर विशब्दन इति स्त्रे विशब्दन इति निषेधाल्लिंगादिति सोऽस्य णिच्॥ घो
षति इत्यादर्ङ् वा॥ अघुषत्। एयंतस्य त्तु॥ अजुषत्॥ आङः क्रंदसातत्ये भौवादि
कः क्रन्द धातुराह्वानाद्यर्थ उक्तः स एवाङ् पूर्वो णिचं लभते सातत्ये। आक्रन्दयति। अन्ये तु
आङ् पूर्वो घुषिः क्रंदसातत्य इत्याहुः। आघोषयति। लस शिल्पयोगे तसि भूष अलंकृ
रे। अवतंसयति। भूषयति। अर्ह पूजायां। ज्ञा नियोगे। आज्ञापयति। भज मजि विश्राणने।
श्र्धु प्रसहने। अशाब्दं तु अशी श्र्धयत्। यत निकारोपस्कारयोः। रक लक आस्वाद
ने। रघ इत्येके। रगेत्यन्ये। अंचु विशेषणे। अंचयति। उदित्त्वमिङ् विकल्पार्थं। अतए
व विभाषितो णिता। अंचति। एवं श्र्धयस्तु प्रभृतीनामपि बोध्यं। लिगि चित्रीकरणे।
लिङ्गयति। लिगति। मुद संसर्गे। मोदयति सक्तून् घृतेन। त्रस धारणे। ग्रहण इत्येके। वार

णाइत्यन्ये। उभ्रस उञ्छे। उकारो धात्ववयव इत्येके। उकार इडित्यपरे। नेत्यन्ये भ्रासयति। उभ्रासयति। मुच प्रमोचने। मोचयति। षट्ट पुट्ट लुट्ट तुजि मिजि पिजि लुजि भजि लघि त्रसि पिसि कुसि दसि कुशि घट घटि बृहि बर्ह बल्ह गुप धूप विच्छ चीव पुथ लोकृ लोचृ णद कुप तर्क वृतु वृधु भाषार्थाः। पाटयति। पोटयति। तुञ्जयति। एवमन्येषाम्। घाटयति। घण्टयति॥ नाग्लोपि शास्वृदिताम्। णिच्यग्लोपिनः शास्तेः ऋदितां च उपधाया ह्रस्वो न स्यात् चङ्परे णौ। अतुलोकत्। अवर्त्तयति। उदिवाद्वर्तीति वर्द्धति वर्द्धति। रुट लजि अजि दसि भृशि रुशि शीक नट पुटि जुचि रघि लघि अहि रहि महि लडि तड नल च। पूरी आप्यायने। इदित्वान्निष्ठायां मिरिणनिषधाय। अत एव णिज्वा। पूरयति। पूरति। रुज हिंसायाम्। ष्वद आस्वादने।

स्वाद इत्येके। असिदत्। दीर्घस्यत्वषोपदेशत्वादिसिस्वरत। आधृषाद्वा। इति
ऊर्ध्वं विभाषितणिचः। ध्रुष धातुमस्तव्याख्या। युज पृच संयमने। योजति। अ
योक्षीत्। पर्चयति। पर्चिता। अयर्चीत्। अर्च पूजायां। षह मर्षणे। साहयति।
मृग्वापंनागः सहति कलभेभ्यः परिभवं। कृ क्षेपे। लीब्रवाकरणे। लापयति।
लेभा। वृजी वर्जने। वर्जयति। वर्जति। वृञ् वरणे। तारयति। वरिता। वरीता।
जॄ वयोहानौ। जारयति। जरति। जरिता। ज्रि च। ज्राययति। ज्रयति। ज्रेता। रि
च वियोजनसंपर्चनयोः। रेचयति। रेचति। रेक्ता। शिष असर्वोपयोगे। शेषयति
। शेषति। शेष्टा। अशिक्षत्। अयं विपूर्वो अतिशयये। तप दाहे। तपति। तप्ता। तृ
प तृप्तौ। संदीपन इत्येके। तपयति। तर्पति। तर्पिता। छृदी संदीपने। छर्दयति।

छर्दिता। छर्दिष्यति। सेसिन्वीति विकल्पोन। माहृन्वयीतन्नरौ धात्विकस्येवग्रहणात्। छप च्छु-
यल्पपदपसंदीपन इत्येके। छपयति। दभीभये। दभयी। दर्भति। दभिता। संदभौ। अयं तुदा-
दावित्। अथमोसरणो हिंसायामित्येको। मागतो भाययति। मयति मेता। ग्रथ बंधने।
ग्रंथयति। ग्रंथति। शीक आमर्षणो। चीक च। अर्द हिंसायां। स्वरितेत्। अर्दयति अर्दति।
अर्दते। हिस हिंसायां। तिंसवति। हिंसति। हिनस्तीति श्नमि गतम्। अर्ह पूजा। आ उः स-
दपथ्यर्थी। आसादयति। असीदति। पात्रे तिसीदा देवाः। आसन्नाः। असात्सीत्। शुंध
शौचकर्मणी। शुंधिता। अशुंधीत्। अशुंधियां। छद अपवारणे। स्वरितेत्। जुष प-
रितर्कणे परि। तर्कणमूहो हिंसा वा। परितर्पण इत्येके। परितर्पणं तृप्तिं क्रिया। जो-
षयति जोषति। प्रीतिसेवनयो जुषते तुदादौ। धूञ् कंपने। नाराणाविलधिक्रित्या। धू प्री

सि०
१०८

तोनुच्चक्तव्यः। धूनयति। धवति। धवते। केचित्तु धूञ् प्रीणेरिति पठित्वा प्रीणाति सा
हचर्यात् धूनाते रेवेत्तुकामाहुः। धावयति। अपस्वादा स्वश्च अपादी तु दादी न्वा स्वा
दुङ्क स्वा। तथा च कविरहस्ये। धूनोति चम्पकवनानि धुनोत्यशोकं तनं धुनाति धु
वति स्फुटितातिमुक्तं। वायुर्विधूनयति चम्पक पुष्परेणून्यत्कानने धवति चंदन
मंजीरश्च॥ प्रीञ् तर्पणे प्रीणयति। धूञ् प्रीणेरिति हरदत्तोक्तपाठे तु प्राययति।
प्रयति। प्रयते। श्रंथ ग्रंथ संदर्भे। आप्ल् लम्भने। आपयति। आपति। आपयते। आ
प्ता। स्वरितेदयमित्येके। आपते। तनु श्रद्धाय करणयोः। उपसर्गाच्च दैर्घ्ये। तान
यति। वितानयति। तनति। चन श्रद्धोपहननयोरित्येके। चानयति। चनति। व
द संदेशवचने। वादयति। स्वरितेत्। वदति। वदते। अनुदात्तेदित्येके। चानय

१०८

ति।च्वनति।वद संदेशवचने।वादयति।स्वरितेत्।वदति।वदते।अनुदात्तइत्ये।
के।ववदतुः।ववदिथ।ववदे।वद्यात्।वच परिभाषणे।वाचयति।वचति।वक्ता
।अवाक्षी।क्षीत्।मान पूजायां।मानयति।मानति।मनिता।विचारणे तु भौवादि
को नित्यसन्नन्तः।स्तम्भे मानयत इत्याकुस्मीयः।मन्यत इति दिवादौ मनुत इति
तनादौ।भू प्राप्तावात्मनेपदी।भावयते।भवते।णिच् संयोगेनैवात्मनेपदमित्ये
के।भवति।गर्ह विनिंदने।मार्ग अन्वेषणे।कठि शोके॥उत्कवैयमुत्कण्ठत इत्या
त्मनेपदी गतः।मृजू शौचालंकारयोः।मार्जयति।मार्जति।मार्जिता।मार्ष्टा।मृ
षति तितिक्षायां।स्वरितेत्।मर्षयति।मर्षभो।मृष्यति।मृष्यत इति दिवादौ सेवने
वापि मर्षीति।धृष प्रहसने।इत्याधृषीयाः।अथादन्ताः।कथ वाक्यप्रबंधे।अक्षो

पस्पस्थात् । निवङ्गावाः तत्वद्धिः । कथयति । अगलोपित्वात् । नदीवृसेरुवङ्गावौ । अचकथत
। वर ईप्सायां । वरयति ॥ वारयतीति गतं । गण संख्याने । गणयति । ई च गणः । गणेरभ्यास
स्य ईत्वं चङ्परे णौ चात् । अजगणत् । अजीगणत् । शास्त्र ऽसम्यगऽवबोधने पठ वट
ग्रंथे । रह त्यागे । अररहत् । स्तन गदी देवशब्दे । स्तनयति । गदयति । अजगदत् । पत गतौ वा
॥ वाणिजंतः । वाऽदंत इत्येके । आधे पतयत । पतति । एतां चकारात् । अपतीतत् । द्वितीये
। पातयति । अपीपतत् । पस अनुपसर्गात् ॥ गतावित्येव । पषयति । स्वर आक्षेपे । स्व
रयति । रच प्रतियत्ने । रचयति । कल गतौ संख्याने च । चह परिकल्कने । परिकल्कनं द
म्भः शाठ्यं च । मह पूजायां । महयति । महतीति त्वापिगतम् । सार कृप श्रथ दौर्बल्ये ।
ससारयति । कृपयति । श्रथयति । स्पृह ईप्सायां ॥ भाम क्रोधे । अबभामत । सूच पैशु

न्ये।स्तवयति।अस्त्वापरेषवा।अष्टवः।असुस्तवत्।रवेदस्त क्षेह्ले।तृतीयांत इत्येको रवोट इत्य-
न्ये।क्षोट क्षेपे।गोम उपलेपे।अजुगोमत्।कुमार क्रीडायां।अचुकुमारत्।शील उपधारणे।
उपधारणमभ्यासः।साम सान्त्वप्रयोगे।असमासामत्।समासाल्लते बुत्सतातस्य।असीषमत्।
वेल कालोपदेशे।वेलयति।काल इति पृथग्धातुरित्यन्ये।पल्यूल लवनपवनयोः।वात सु-
खसेवनयोः।गतिसेवनयोरित्येके।वातयति।अववातत्।गवेष मार्गणे।अजगवेषत्।वास उ-
पसेवायां।निवास आच्छादने।भाज पृथक्कर्मणि।सभाज प्रीतिदर्शनयोः।प्रीतिसेवनयो-
रित्यन्ये।सभाजयति।ऊन परिहाणे।ऊनयति।ओः पुयण्ज्यपरे इति सूत्रे पवर्गयोरिति वक्तव्ये
वर्गप्रत्याहारजकारग्रहणेतिग।णिचि अचवेपोनस्याग्लिलेकार्ये इति यत्र विरुद्धावभ्या-
सोत्तरखण्डस्य आयोच्च प्रक्रियादशायामपरिनिष्ठरूपे वा एवमेव लिख्यते तत्रैवायं निषेधः।

सी० १०८

ज्ञापकस्य सजातीयापेक्षत्वात्। तेनाचिकीर्तदिति सिद्धं। चिते तु न ह्रस्वः स्यात्। दिलंतततरस्वरोऽल्लो
पः। अचीकततत्। मामवानतत्। ध्वन शब्दे। अदध्वनत्। कूट परितापो परिदाह इत्यन्ये। शकेलथा
मन्त्रणगुणचामन्त्रणे। चात् कूटोऽपि। कूटयति। संकेतयति। ग्रामयति। कुणयति। पाठान्तरं के
त आवर्णे निमन्त्रणे चाकेतयति। निकेतयति। कुणगुण चामन्त्रणे। चकाराकेतः। कूणसं
कोचन इति। स्तेन चौर्ये। अतिस्तेनत्। आगर्वादात्मनेपदीनः। पद गतौ। पदते। अपपदत।
ग्रह ग्रहणे। गृहयते। मृग अन्वेषणे। मृगयते। मृग्यतीति कण्ड्वादिः। कूद विस्मापने। अचू
रविक्रान्तौ। स्थूल परिबृंहणे। स्थूलयते। अतुस्थूलत। अर्थ उपयाञ्चायाम्। अर्थयते। आ
र्थर्थत। सर्तथत। सत्र सन्तानक्रियायाम्। सत्रयते। असससत्रत। अनेकाचू ...न्नषोपदेशाः
सितत्रयिषते। गर्व माने। वर्गयते। अदन्तत्वसामर्थ्यात् लिज्विकल्पः। धातोरन्तउदात्तः। लि

१०८

धाम्न्वफलम्।एवमग्रेपि।इत्यागवीयाः॥सूत्र वेष्टने।सूत्रयति।असुसूत्रत।मूत्रप्रस्रव
णे।मूत्रयति।मूत्रति।मूत्रा।अकार।पार।अपपूरूष्ये।पार तीर समाप्तौ।अपपारत्।अतितीरत
।पुट संसर्गे।पुटयति।धेक दर्शनइत्येके।अदिधेकत्।कत्र शैथिल्ये।कत्रयति।कर्तेत्य
प्येके।कर्तयति।प्रातिपदिकाद्धात्वर्थेबहुलमिष्ठवच्च।प्रातिपदिकाद्धात्वर्थे णिच्स्या
त्।इष्टे यथाप्रातिपदिकस्यपुंवद्भावरभावटिलोपविन्मतुब्लोपयणादिलोपप्रस्थ
स्फाद्यादेशाभसंज्ञास्तद्वणावपिस्युः।पटुमाचष्टे पटयति।परत्वाद्वृद्धौसत्यांटिलोपः।
अपीपटत्।णौ चङी त्यत्र भाष्ये तुवृद्धेर्लोपोवलीयानितिस्थितम्।अपपटत्।त
त्करोति तदाचष्टे।पूर्वस्य प्रपञ्चः।करोत्याचष्टइतिधात्वर्थमात्रं णिजर्थः।लडर्थस्त्व
विवक्षितः।तेनातिक्रामति।अत्यश्वयति।हस्तिनातिक्रामति।अतिहस्तयति।धातु

रूपञ्च। णिच्प्रकृतरूपं धातुरूपमप्रतिपद्यते। चशब्दोऽनुक्तसमुच्चयार्थः। तथाच
वार्त्तिकं। आख्यानात्कृतस्तदाचष्ट इति णिच्कृल्लुक्प्रकृतिप्रत्यापत्तिः प्रकृतिवच्च कारकमिति।
कंसवधमाचष्टे कंसं घातयति। इह कंसहननमिति स्थिते। हनस्तोऽचिण्णलोः। हंते
स्तकारे तादेशस्याचिण्णल्वर्जे णिति। ननु आगमसंज्ञा धातुसंज्ञा च कंसविशिष्ट
स्य प्राप्नोति तस्याद्वृद्धित्वयोर्दोषः। किञ्च कुत्वतत्वे न स्यातां धातोस्स्वरूपग्रहणे त
त्प्रत्यये कार्यविज्ञानात्। सत्यं प्रकृतिवच्चेति चकारो भिन्नक्रमः। कारकञ्च। चाला
र्थी हेतुमणिचः प्रकृतेर्हन्यादेर्हेतुमत्सम्बोध्यादर्शाकारकं धातावनतर्भूतं द्वितीयांत
या दर्शनञ्च कार्यं कुत्वतत्वादितदिहापीत्यर्थः। कंसमजीघतत्। कर्तृकरणाच्चाल
र्थे। कर्तुर्व्यापार्थे यत्करणं नत्वञ्च क्षुरादिमात्रमित्यर्थः॥ असिना हन्ति असयति॥

वप्कदर्शनो णिच्वं लभते। वष्कयती॥ चित्र चित्रकरणे॥ आलेख्यकरण इत्यर्थः। क
दाचिद्दर्शने॥ चित्रेत्ययमद्भुतदर्शने णिचं लभते। चित्रयति। अंस समाघाते। व
ट विभाजाने लज प्रकाशाने वहिलजि इत्येके। वंटयति। लंजयति। अदंतवु पा
ठबलाद्दन्तलवेवृद्धिरित्यन्ये। वंटाययति। लंजापयति। शाकटायनस्तु कथादी
नां सर्वेषां पुषमाह। तन्मनेकथापयति। गणापयतीत्यादी॥ मिश्र संपर्के। संग्राम
युद्धे। अनुदात्तेत्। अकारप्रश्लेषात् अससंग्रामत। स्तोम श्लाघायां। अतुस्तो
मत्। छिद्र करणभेदने। करणभेदन इत्येके कर्णेति धात्वंतरमित्यन्ये। अ धद्द
क्षुपघाते। उपसंहार इत्यन्ये॥ अन्दधत्। दण्डहदण्ड निपातने। अंकयद्दलक्ष्
ते च॥ अंचकत्॥ अंगच। आञ्जगत्। सुखदुखतिक्रियायां। रस आस्वादनस्ने

सि॰
११॰

हनयोः। व्ययक्तिसमुत्सर्गे अवव्ययत। रूपरूपक्रियायां। रूपस्यदर्शनंकरणं वाक्रिया। छेदद्वैधीकरणे अचिच्छेद्। मृत। छदअपवारणइत्येके। छदयति। लाभप्रेरणे अंगगात्रविचूर्णने। वर्णवर्णक्रियाविस्तारगुणानन्वनेषु। वर्णक्रियावर्णकरणं सुवर्णंवर्णयतिकथांवर्णयतिविस्तृणातीत्यर्थः॥ हरिंवर्णयति। स्तौतीत्यर्थः। बहुलमेतिनिदर्शनंअदंतधातुनिदर्शनमित्यर्थः। बाहुल्यका दन्येपिबोध्याः। तद्यथा पर्णंहरितभावे। अपपर्णत। विष्कदर्शने। क्षपप्रेरणे। वसनिवासे। तुत्थआवरणे। एवमांदोलयति। प्रेंखोलयति। विडंबयति। अवधीरजतीत्यादि॥ अन्येतुदशगणीपाठोबहुलमित्यादि। तेनापठितअपिसौत्रलौकिकवैदिकाबोध्याः। अपरेतुनवगणीपठितेभ्योपिष्कोन्वित्स्वार्थेणिच्। रामो

११०

राज्यमचीकमत्। इति यन्नेत्याहुः। चुरादिभ्य एव बहुलं णिजित्यर्थ इत्यन्ये। सर्वे पक्षाः
प्राचां ग्रंथस्थिताः। णिङ् अङ्गान्निरसने। अङ्गवाचिनः प्रातिमाकान्निरसनेऽर्थे णिङ्
स्यात्।। हस्तौ निरस्यति हस्तयते। पादयते। श्वेताश्वाश्वतरगालोडिताह्वरकाणाम
श्वतरेतकलोपश्च। श्वेताश्वादीनां चतुर्णां मश्वादयोर्लुप्यं णिङ् त्वधात्वर्थे। श्वेता
श्वमाचष्टे तेनातिक्रामति वा श्वेतयते। गालोडितं वाचां विमर्शः। तत् करोति गालो
डयते। आह्वरयते। ङित्त्वं तु णिचमेवानुवर्त्तयन्ती। तन्मते परस्मैपदमपि। पुच्छादि
षु धात्वर्थ इत्येव सिद्धं। णिजंतादेव बहुलवचनादात्मनेपदमस्तु पुच्छमाराडेति णि
ङ्विधिः। सिद्धशब्दो ग्रंथान्ते मंगलार्थः।। इति चुरादयः।। तत्प्रयोजको हेतुश्च। कर्त्तुः
प्रयोजको हेतुसंज्ञः कर्तृसंज्ञः। हेतुमति च। प्रयोजकव्यापारे प्रेरणादौ वाच्ये धातो

णिञ्चूस्यात्॥ भवंतंप्रेरयति भावयति। णिचश्चेति कर्त्रभिप्राये आत्मनेपदं। भावयते
। भावयाम्बभूव। ओः पुयण्ज्यपरे। सनि परे पदं गतद्वयनादभ्यासोकारस्येत्वं स्या
त्। पवर्गयणजकारे ष्ववर्णे परे धुपरतः॥ अबीभवत्। अपीपवत्। मूअमीमवत्
। अबीयवत्। अरीरवत्। अलीलवत्। अजीजवत् स्रवति। स्रुणोति। द्रवति। प्रवति
ह्रवति। च्यवति नांवा। एवामभ्यसोकारस्य इत्वं वा स्यात् सनि अवर्णे परे धात्वक्षरे प
रे॥ असिस्रवत्। असुस्रवत्। नाग्लोपीति ह्रस्वनिषेधः। अशशासत्। अडुढौक
त्। अचीचकासत्। मतांतरे अचचकासत्। अग्लोपीति सुधातु प्रकरणोदाह
रिष्यते। णयन्तात् णिच्। एवं विप्रतिषेधादपवादत्वाद्बाह्यद्विम्वा धित्वात् णिलोपः। चो
रयति। णौ चङ्युपधायाः ह्रस्वः। दीर्घोलघोः। नन्वाग्लोपित्वाद्ध्रस्वस्य सन्त्वः। णयाद्यमतिति

देवित्वात्। अचू चुरत्॥ णौ चङ्ओः सन्यतस्वकू परेण्वणिश्वयते संप्रसारणं स्यात्। सं
प्रसारणान्तदा अयं चका वञ्चवदितिवचनात्संप्रसारणं पूर्वरूपं। अश्वशवत्।
अल्लघुत्वान्नुदीर्घः असिश्वयत्। स्तक सिबुसहां चङि। उपसर्गनिमित्तषणो
सस्यनस्याच्चङि॥ अवातस्तम्नत्। पर्यसीषृवत्। न्यषीसहत्। आटिव्वत्॥ आशि
शत्। वहिरंगोप्युपधार्कस्वो द्वित्वात्प्रागेव। ओरोर्णी द्वित्कर णाद्विज्ञात्। माभवा
नि। दिधत्। एजादावेधतौ विधानान्तवृद्धिः। माभवानेदिधत्। नन्द्वाइतिनदरा
णान्नाद्वित्वं। ओन्दिदत्। आड्डिडत्। आचिच्चित्। उर्णु ओर्णुवीत्। उपदेशेरोदव
कारापधः भुजन्युब्जौपाण्युपतापयोरितिसूत्रेनिपातनाद्भस्वः। सञ्चान्तेर

सि:
११२

ङ्गोपिद्वित्वविषयेनन्द्राइतिनिषेधाज्जिशब्दस्य द्वित्वे कृते प्रवर्त्तते। नतुतलःप्रा
क् दकारोच्चारणसामर्थ्यात्। औब्जिजत्। आजादेरित्येव। नेह। आदिद्रपत्। र
भेरसन्धितोः रभेर्नुम्स्यादविनतुच्याह्लिटोः। रभे अच्। अररंभत्। अललंभत्।
हेरच्च ङीतिसूत्रेऽच्वङीत्युक्तेः कुत्वन्न। अजीहयत्। अत्स्मरदृत्वरप्रथम्रद
स्तॄस्पृशाम्॥ अससमरत्। अददरत्। तपरत्वसामर्थ्याहित्रत्वान्नदीर्घः। वि
भाषावेष्टिचेष्टोः॥ अभ्यासस्याऽत्वंवासोद्धुङ्परेणौ। अववेष्टत्। अविवेष्टत्।
अचचेष्टत्। अचिचेष्टत्। भ्राजभासेत्यादिना वोपधाह्रस्वः। अविभ्रे
जत्। अविभ्राजत्। काण्यादीनां वेति वक्तव्यं। रपंताकरणभणश्रणलु

११२

पत्नुपहेठः कारयादयः षड्डाप्येयुक्ताः ढ्वायिवाणिलोटिलोपयस्वत्वारोधिकान्यासे।
चाणिलोडी अथन्यत्रइत्यदन्तृशा। अचीकणत्। अचकाणत्। स्वापेश्चङि। णयन्त
स्यस्वपेश्चङि संप्रसारणं स्यात्। असूषुपत्। णाछासाह्वाव्यावेपां युक्। णौपरे। ह्व
पयति ह्वः संप्रसारणं। सन्यश्चङ्परे च णौ ह्वः संप्रसारणं स्यात्। अजूहवत्। अजु
हावत्। लोपः पिबतेरीच्चाभ्यासस्य। पिबतेरुपधाया लोपः स्यादभ्यासस्य ईत्ता दे
शश्च चङ्परे णौ॥ अपीप्यत्। अर्तिप्रीतिपुक्॥ अर्पयति ह्रूपयति। ह्रेपमति। रे
पयति। यलोपः। नगेपलोपः। क्नोपयति। क्ष्मापयति। स्थापयति। तिष्ठतेरित्। उप
धाया इदादेशः स्याच्चङ्परे णौ। अतिष्ठिपत्। जिघ्रतेर्वा। अजिघ्रिपत्। अजघ्र
पत्। अचीक्लृतत्। अचिकीर्त्तत्। अवीवृतत्। अववर्त्तत्॥ अमीमृजत्। अममा

सि॰
११३

जेत। पातेर्णौ लुग्वक्तव्यः। पुको पवादः॥ पालयति॰ वो विधूनने तुक्। वातेर्णौ जु
क्सात्। कंपे थी वाजयति। कंपे किके शान्वापयति। विभाषा लीयते। ली लोर्नुग्लु
कावन्यतरस्यां स्नेह विपातने। लीयतेर्लाति श्च क्रमान्नुग्लुकावागमौ स्तो वा णौ।
स्नेहद्रुमे। विलीनयति। विलाययति। विलालयति। विलापयति वा घृतं। लीङ् इ
तिईकारप्रश्लेषादात्वपुक्षे नलुक्। स्नेहद्रुवे कि। लोहं विलापयति। प्रलंभनाभि
भवपूजासु लियो नित्यमात्वमशिति वाच्यं॥ लियः संमानन शालीनीकरणयोश्च
। लीङ् लियोरर्थयोरात्मने पदं स्यात् कर्तृगे पि फले पूजाभिभवयोः प्रलंभने त्वार्थे
। जटाभिर्लापयते पूजामधिगच्छतीत्यर्थः। श्येनो वर्तिकामुल्लापयते अभिभ
वतीत्यर्थः। बालमुल्लापयते वंचयतीत्यर्थः। बिभेतेर्हेतुभये विभते रे वक्रा स्व

११३

वास्या प्रयोजकाङ्कयं चेत्। भीस्म्योर्हेतुभये। आभ्यासात्मनेपदं स्याद्धेतो श्चेद्भयस्म
यो। सूत्रे भयग्रहणं धात्वर्थोपलक्षणं मुण्डो भापयते। भियो हेतुभये षुक्। भी ई इ
तीकारः प्रश्लिष्यते ईकारान्तस्यापि षुकस्यात् हेतुभये। भीषयते। नित्यं स्मयतेः
। स्मयतेरेचो नित्यमात्वं स्यात् स्मो हेतौ स्मये। जटिलो विस्मापयते। हेतौ श्चेद्भय स्मया
वित्युक्ते नेह। कुञ्चिकयैनं भायति। कथं तर्हि विस्मापयन् विस्मितमात्मवृत्ता वि
ति। मन्तुष्यवाचेति करणे देवहितत्र स्मयः। अन्यथा शानजपि स्यात्। तस्यं विस्म
ययन्निति एव पाठ इति सांप्रदायिकाः। यद्वा मतुष्यवाक्प्रयोज्यकर्त्री विस्मापयते
। तया सिंहो विस्मापन्निति तिरायं ताणो शातेति व्याख्येयं। स्फायो वः णौ। स्फावयति।
शदेरगतौ तः। शदे णौ तोऽन्तादेशः स्यान्नतु गतौ। शातयति। गतौ तु गाः शादय

तिगो विंदः। गमयतीत्यर्थः। रुहः पोन्यतरस्यां। णौ। रोपयति। रोहयति। क्रीङ्जी
नां णौ। एषामेच आत्स्याणौ। क्रापयति। अध्यापयति। जापयति। णौ च सं श्चं
ङोः। सन्परे चङ्परे णावि ङो गाङ्वा स्यात्। अध्यजीगपत्। अध्यापिप
त्। सिध्यतेरपारलौकिकः। ऐहलौकिकार्थे विद्यमानस्य सिध्यतेरेच आ
त्वं स्याणौ। अन्नं साधयति। निष्पादयतीत्यर्थः। अपारलौकिके। किं तापसः सिध्य
ति। तत्वं निश्चिनोतीत्यर्थः। तन्मेरयति सेधयती तापसस्तपः। प्रजने वीय
तेः। अस्ये च आत्वं स्याद्वा णौ प्रजनेर्थे। वापयति। वापयति। गां पुरोवातः। ग
र्भं ग्राहयतीत्यर्थः। ऊदुपधाया गोहः। गूहयति। दोषो णौ। दुष इति सुवचं। दु
ष्यतेरुपधाया ऊः स्याणौ। दूषयति। वा चित्तविरागे। चित्तविराऽगो प्रीति

ता। निन्तं द्धू दूषइ तिवाकांमः। मितां ह्रुस्वः। भ्वादौ न्वुरादौ च मितिङ्क्ताः। घटयति
।जनी जृष्। जनयति। जृष्। जरयति। जृष्णत स्तु जारयति। रंजेर्णौ मृगार म
णे नलोपो वक्तव्यः। मृगरणमार नेट वक्त रजयति मृगान् मृगो तिकिं। रंजयति प
क्षिणः। रमणादन्यत्र तु रंजयति मृगाणात्। णौ गमिरबोधने। इणो गमिः स्याणौ।
गमयति। विबोधनं तु प्रसाययति। प्रसायियत्। इएवादिकः। अधिगमयति। ह
नस्तो चिण्णलोः। होहंते रितिकुत्वं। घातयति। ईर्ष्यियति। ईर्ष्यतेस्तृतीयस्येति वक्त
व्यं। तृतीयव्यंजनस्य। तृतीयेकाच् इति वार्थः। आद्य षकारस्य द्वित्वं वारयितु
मिदं। द्वितीयस्वजादेर्द्वितीयस्येत्यस्यापवादः तयासन्नंते प्रवर्त्तते। ऐर्ष्यियत्।
द्वितीयव्याख्यायां णिजंता त्साङि षकारस्यवाभ्यासे श्रूयते। हलादिःशेषात्। द्वि

त्वंतुद्वितीयस्यैव। तृतीयाभवेतप्रकृतवार्त्तिकाप्रवृत्तेः। निवृत्तप्रेषणाद्धातोर्हे
तुमर्णौ शुद्धेनतुल्योर्थः। तेनप्रार्थयंतिशयनोत्थितंप्रियाइत्यादिसिद्धं। एवंसक
र्मकेषुसर्वेषुऊह्यं। ।इतिण्यंतप्रक्रिया। ।धातोःकर्मणःसमानकर्तृकादिच्छायां
वा। इषिकर्मणइषिणैककर्तृकाद्धातोः सन्प्रत्ययोवास्यादिच्छायां। धातोर्विधि
रिहसनन्ताऽर्हः धातुकर्त्री। इट् द्वित्वं। संन्यऽे सन्यतः। पठितमिच्छतिपिपठिष
ति। कर्मणः किं। गमनेनेच्छति इतिकरणान्माभूत्। समानकर्तृकात्किं। शिष्याः
पठंतुइतीच्छतिगुरुः। वाग्रहणात्पक्षेवाक्यमपि। लुङ्सनोर्घस्लृ। एकाच
उपदेशइतिनेट्। सस्यतः। अत्तुमिच्छतिजिघत्सति इट्ष्यतेस्तृतीयस्येति

षिसनोर्द्वित्वं। ईर्ष्यियिषति। ईर्ष्यिषिसति। रुदविदमुषग्रहिस्वपिप्रच्छः सं श्चा। ए
भ्यः संश्च क्त्वा च कितौ स्तः। रुरुदिषति। विविदिषति। मुमुषिषति। सनिग्रहगुहो
श्च। ग्रहेर्गुहेरुगंताच्च सन इण न स्यात्। ग्रहिज्येति संप्रसारणं। सनः षत्वस्या
सिद्धत्वाद्द्वित्वाभावः। जिघृक्षति। जुघुक्षति। किरश्च पंचभ्यः। कॄ गॄ दृङ् धृङ् प्रच्छ
एभ्यः सन इट् स्यात्। पिपृच्छिषति। चिकरिषति। जिगरिषति। अवटोदीर्घो
नेष्टः। दिदरिषते। दिधरिषते। कथमुदिधीर्षुरिति। भौमवादिकयोर्धृङ् धृ
ञोरिति ग्रहणा। इको झल्। इगंताज्झलादिः। यिषति। इ विविषति। रुदविद
मुषग्रहिस्वपिप्रच्छः सं श्च। एभ्यः सं श्च क्त्वा च कितौ स्तः। रुरुदिषति। मुमु
षति। सनिग्रहगुहो श्च। ग्रहेर्गुहेरुगंत्ताच्च सनइण न स्यात्। ग्रहिसंप्रसा

सि॰
११९

रणं। सनः षत्वस्यासिद्धत्वात् भावः॥ जिघत्सति। सुषुप्सति। किरश्च पंचभ्यः
। कॄ गॄ दृङ् धृङ् प्रछ एभ्यः सन इट् स्यात्। पिपृच्छिषति। चिकरिषति
॥ले जिगरिषति। जिगलिषति। अघोनिस्त दिदरिषति। दिधरिषते। कथमु
हिपीषुरिति मीवादिकयोर्ष्ट इछजोमिलिग्रहणा इको झल। इगंता
ज्झलादिः सन् कित् स्यात्। बुभूषति। दीङ्। दातुमिच्छति दिदीषते।
राज्जिवषये त्वाभावान्मीनाति मिनोतीत्यात्वं न। अत एव सानि मे नेति
सूत्रे मा धातोः पृथक् मीग्रहणं कृतं। हलंताच्च। इक्समीपाद्धलः परो झलादिः सन्
कित् स्यात्। दुह। दुधुक्षति। विभित्सति। इकः किं। यियक्षते। हल किं। विवर्द्धिष

११९

ते। हलग्रहणं जातिपरं। लंहूतिलक्षासितिलं हिषति। अजु निगमां सनि। अतंतानां
हंतेरजादेशागमे अदीर्घः स्याज्झतादो सनि। सनिसवो अ्रः। जीगीषति। विभाषी
वो च्चिकीषति॥ बिभ्रीषति। जिघांसति। सनि च। इ णोगभिस्यात्सनिनतुवोधते
जिगमिषति। वोधः। ने तु प्रतीषिषति। इणवदिक। अधिजिगमिषति। कर्मीणात
ड। परस्मैपदेष्वि सुप्तेने नैट कृत्वादोसनि इ तिदीर्घः॥ गिगां ष्यते। अधिजिगांष्यते
। रलव्याः। पथाहलादे संश्च। उ अइ अवतिउ प देधेयस्यतस्माद्धलादेरनुं
तास्य क्षेदो च्चुा च्वसतोसे टोज्ञाकितोस्तः। धुतिस्वाप्योयामत्तु। एणुणाचामत्रेणा
। नात कूटोपि। कूटयति। सङ्कुतयति। ग्रामयति। ऊणयति। गुणयति। पाठान्ह
रं केत श्रावणे निमन्त्रणे च। केतयति। निकेतयति। कुणगुणा च्वामन्त्रणे च

कारात्केतः। गुणा सङ्क्रोन्च नइति। स्तेन चौर्ये। अतिस्तेनत्। आगर्वादात्मनेपदि
नः। पद गतौ। पदते। अपपदत। गृह ग्रहणे। गृहयते। मृग अन्वेषणे। मृगयते
। मृग्यतीतिकश्चित्। कुह विस्मापने। शूर वीर विक्रान्तौ। स्थूल परिबृंहणे
। स्थूलयते। अतुस्थूलत। अर्थ उपयाच्ञायाम्। अर्थयते। आर्तथत। स
सन्तान क्रियायाम्। सत्रयते। अससत्रत। अनेकाच्त्वान्न षोपदेशः। सि
सत्रयिषते। गर्व माने। गर्वयते। अ दन्तत्व सामर्थ्याणिज्विकल्पः। धातोरन्त
उदात्तः। विधान् च फलम्। एवमग्रेपि॥ इत्यागर्वीयाः॥ सूत्र वेष्टने। सूत्रय
ति। असुसूत्रत्। मूत्र प्रस्रवणे। मूत्रयति। मूत्रति। मूत्रा। अकारः। रूक्ष
पारुष्ये। पार तीर समाप्तौ। अपपारत्। अतितीरत्। पुट संसर्गे। पुटयति।

संप्रसारणं। द्युतिषते। दिद्योतिषते। रुरुचिषते। रुरोचिषते। लिलिखिषति। लिलेखिषति॥ रलः
किं॥ विदिदेविषति। व्युय धातोः किं। वर्त्तिषते। हलादेः किं। एषिषिषति। इह नित्यमपि द्वित्वे गुणेन वा
ध्यते। उपधाकार्यं हि द्वित्वात्प्रबलं। ओर्गुणेऽर्द्दिद्विलकरणस्य सामान्यापेक्षज्ञापकत्वात्।
सनीवंतर्धभ्रस्जदम्भुश्रिस्वृयूर्णुभरज्ञपिसनाम्। इवन्तेभ्य अष्टादिभ्यश्च सन इड्वा स्या
त्। इडभावे हलन्ताच्चेति कित्वं। च्छ्वोरिति वस्य ऊठ्। यणा द्वित्वं। दुद्यूषति। दिदेविषति। सेवोति
शयोरवेति वस्य समानानिपमात् षः। सुषूषति। सिषेविषति। आप्ज्ञप्यृधामीत्। एषामच इ
ईत्स्यात्सादौ सनि। अजलोपोऽभ्यासस्य। सनी मामेत्यारभ्य यद्युक्तं तत्राभ्यासस्य लोपः स्या
त्। आप्तुमिच्छति ईप्सति। आर्द्दितुमिच्छति। अभ्यासलोपः। चर्त्वम्। ईर्त्सति। आर्दि
धिषति। विभ्राजिषति। विभर्जिषति। विभ्रक्षति। विभर्क्षति दम्भ इच्च। दम्भेश्च इ इत्स्यात्

सिं
११८

वसादौसनिअभ्यासलोपः।हलंताच्चेत्यत्र हल्ग्रहणंजातिपरमित्युक्तं।तेनसनः किल्वा
न्नलोपः।धिप्सति।धीप्सति।दिदम्भिषति।शिश्रीषति।शिश्रयिषति।उदोष्ठ्यपूर्वस्य।सुस्मू
र्षति।सिस्वरिषति।युयूषति।ऊर्णुनविषति।ऊर्णुनविषति।नचपरत्वाद्गुणादेशेयोः
सतोरभ्यासउकारेणश्रूयेतेतिवाच्यं।द्विर्वचनेचीतिसूत्रेणद्वित्वेकर्त्तव्येस्थानि
रूपातिदेशात्।आदेशनिषेधाद्वा।नचसन्नन्तस्यद्वित्वंप्रतिकार्यित्वान्निमित्तता
कथमितिवाच्यं।कार्यमनुभवन्हिकार्यीनिमित्ततयानाश्रीयतेनत्वननुभवन्न
पिनचेहसन्द्वित्वमनुभवति।बिभरिषति।बुभूर्षति।ज्ञपिःपुगंतोमित्संज्ञःपका
रांतः।औरादेशआइउभावेइकोभवतीतिकित्वान्नगुणः।अनुनेतिदीर्घःपरत्वा
णिलोपेनबाध्यते।आप्ज्ञपीतिईत्।ज्ञीप्सति।जिज्ञपयिषति।आप्तस्त्रःजिज्ञा

११८

पयिषति। जनसनेस्यात्वं। सिषासति। सिसनिषति। तन पाति दरिद्राति भ्यस्सनो वा
ङ्वाच्यः। तनोतेर्विभाषा। अस्योपधाया दीर्घो वास्यात्कुलादौ सनि। तितांसति। तितंस
ति। तितनिषति। आसंकायां सत्व तन्व्य। श्वामुमूर्षति। कुलंपियषति। सनिमीमा
घुरभलभशकपतपदामच इस। एषामचस्स्यात्सादौ सनि। अभ्यासलोपः। स्कोरि
तिसलोपः। पित्सति। दद्रि द्रिवति। दिदरिद्रासति। डुमिञ्। अभ्यासन। इत
दीर्घस्य मिनोतेरपि मीरूपाविशेषादिस्। सस्सनीतिसमित्सतिः। मित्सते। धेट् मामाः
॥ मित्सति। माङ् मेङो। मित्सते। दो दाणोः दित्सति। देङ्। दित्सते। दाञ्। दित्सति। दित्स
ते। धेट्। धित्सति। धाञ्। धित्सति। धित्सते। रिप्सति। लिप्सते। शाक्ल। शिक्षति। त
कमर्षणा इति दिवादिः। स्वरितेत्वा शिक्षति शिक्षते। पित्सते। राधो हिंसायां सनी स्वा

ध्यः। रित्सति हिंसायां किं। आरिरात्सति। मुचोकर्मकस्य गुणो वा। सादौ सनि। अभ्या
सलोपः। मोक्षते मुमुक्षते वत्सः स्वयमेव। अकर्मकस्य किं। मुमुक्षति वत्सं कृष्णः। न
वृध्यःश्चतुर्भ्यः। विवृत्सति। तङि तु विवर्तिषते। सेसिचीति वेट्। निनर्तिषति।
निनृत्सति। इट् सनि वा। वृङ्वृञ्भ्यां ऋदन्ताच्च सन इड् वा स्यात्। तितरिषति। ति
तरीषति। तीर्षति। विवरिषति। वुवूर्षति। वृङ्। ववूर्षते। दुधूर्षते। स्मिपूङ्रञ्ज्व
शां सनि। स्मिपूङ् ऋ अञ्जू अशूरएभ्यः सन इट् स्यात्। सिस्मयिषते। पिपविषते।
अरिरिषति। इट्। रिं सूत्राद्वस्य द्वित्वं। इस् इति सनो वपवकार्यं भागति कार्पिणानि
मित्तत्वायोगात् द्विर्वचनं चेति न प्रवर्तते। अंजिजिषति। अशिशिषते। उभौ
साभ्यासस्य प्राणिणिषति। उच्छेस्तकः। चुत्वं। एवं त्रासि धीयमद्विलेदिति चक्षाभ्यां स

हितस्येटोहित्वं। हलादिःशेषः। इचिच्छिषति। निमित्तापायनैमित्तकापायाइति त्वति

त्यां घ्छो रितिसतुक ग्रहणात ज्ञापकात्। प्रद्धातिप्रत्यायन्निवचना घा। णौन्वसंश्चंओ

रितिस्त्राभ्यामिडोगाङ्स्वयते। संप्रसारणांन्चवा। अधिजिगापयिषति। अध्या

पिपापिषति। शिश्वायपिषति। शुशावपिषति। कः संप्रसारणं। जुहावयषति।

णोहित्वात्प्रागन्चआदेशोनेत्युक्तत्वादुकारस्याहित्वं। पुस्फारयिषति। चुक्षाव

यिषति। ओः पुयणपरे। पिपावयिषति। विभावयिषति। रिरवयिषति। लि

लावयषति। जिजावयिषति। पुयण्जिक्षु। नुनावयिषति। अपरे कि। बुभूष

ति। स्तवतीतित्ववा। सिस्त्रावयिषति। इत्यादि। अपर इत्येव। तुस्तूषते। स्तौति

ण्योरेवपण्यत्यासात्। अभ्यासणः परस्यस्तौति ण्यन्तयोवसस्यषः स्यासत्व

मूतेषनि। नान्यस्य। तुष्टूषति। स्तुतिस्वाप्योरित्युक्तम्। सुस्वापयिषति॰ सिषाधयिषति। स्तो
तिण्योः किं। सिसीक्षति। उपसर्गात्तु स्यादिष्वभ्यासेन च इति षत्वं। परिषिषिक्षति। षणि किं। ति
ष्ठासति। सुसुप्सति। अभ्यासादित्युक्तेर्नेह निषेधाइणः। प्रतीषति। इकः। अधीषिषति। सः
स्विदिस्वदिसहीनां च। अभ्यासेन परस्य एपतानामेव सस्य स एव न षः सनि परे। सि
स्वेदयिषति। सिस्वादयिषति। सिसाहयिषति। स्थादिष्वेवाभ्यासस्येति नियमान्नेह।
अभिसुसूषति। शैषिकान्मतुबर्थीयाच्छैषिको मतुबर्थिकः॥ सरूपप्रत्ययान्तेष्टः
सन्नन्तान्न स निष्यते॥ शैषिकात् शैषिकः सरूपो न। तेन शालीये भवइति वाक्य
मेव। न तु छान्ताच्छः॥ सरूपे किं। अहिच्छत्रे भवः आहिच्छत्रः॥ आहिच्छत्रे भव
आहिच्छत्रीयः॥ अणन्ताच्छः। तथा मत्वर्थात्सरूपः सन्न॥ धनवानस्यास्तीइ

मतुबंतान्मतुब्न। विरूपस्तुस्यादेव। दंडिमतीशाला॥ सरूपइत्यतुषज्यतो। अर्थद्वा
रासाहश्यंतस्यार्थस्तेनइच्छासन्नंतात्सन। विरूपस्तुस्यादेव। जुगुप्सिषते। मीमांसि
षते॥ इतिसनप्रक्रिया॥ २ धातोरेकाचोहलादेःक्रियासमभिहारेयङ्॥ पोनःपुन्य
न्यशार्थश्चक्रियासमभिहारस्तस्मिन्द्योत्येयङ्स्यात्। गुणोयङ्लुकोः। अभ्या
सस्यगुणःस्याद्यङियङ्लुकिच। सनाद्यंताइतिधातुत्वं। लङादयः। ङिदंतत्वा
त्तङादयः४। पुमःपुनरतिशयेनवाभवतिबोभूयते। बोभूयांचक्रे। अबोभूयिष्ट
। धातोःकिम्। आर्द्धधातुकत्वम्। यथास्यात्। तेनअबोभवन्निरित्यादि। एकाचः॥
किम्। पुनःपुनर्जागर्ति॥ हलादेःकिम्। भृशमीक्षते। भृशंशोभते रोचते। इत्यत्रय
ङेतिभाष्यं॥ पोनःपुन्येतुस्यादेव॥ रोरुच्यते। शोशुभ्यते। सूचिसूत्रिमूत्र्यट्यर्त्य

सि॰
२२१

सूचिसूत्रिमूत्र्यट्यर्त्यशूर्णोतिभ्यो यङ् वाच्यः॥ आद्यास्त्रयश्चुरादावदंताः। सोसूच्यते। सोसूत्र्यते। मोमूत्र्यते।
अनेकाच्त्वकत्वेनाषोपदेशत्वात्षत्वं न॥ यस्य हलः। यस्येति संघातग्रहणम्। हलः
परस्य यशब्दस्य लोपः स्यात् आर्धधातुके। आदेः परस्य। अतो लोपः॥ सोसूचांच
क्रे। सोसूचिता। सोसूत्रिता। मोमूत्रिता॥ दीर्घोऽकितः॥ अकितोऽभ्यासस्य दीर्घः स्या
द्यङि यङ्लुकि च। अटाट्यते। यङि च॥ ऋतः संयोगादेश्च ऋतो गुणः स्याद्यङि। य
कारपररेफस्य न द्वित्वनिषेधः॥ अरार्यते॥ इति भाष्योदाहरणात्। अरारिता॥
अशाशिता। ऊर्णोनूयते॥ बेभिद्यते। अल्लोपस्य॥ स्थानिवत्त्वान्नोपधागुणः॥ बेभि
दिता। नित्यं कौटिल्ये गतौ॥ गत्यर्थात्कौटिल्य एव यङ्॥ स्यान्न तु क्रियासमभिहारे
। कुटिलं व्रजति वाव्रज्यते। लुपसदचरजपजभदहदशगॄभ्यो भावगर्हायाम्।

२२१

एभ्यो धात्वर्थगर्हायामेव यङ् स्यात्। गर्हितं लुंपति लोलुप्यते। सा॥ सस्यते। चरफलो श्च॥ अनयोरभ्यासस्यातो नुक् स्यात् यङ्लुकोः। नुगित्यनेनानु॥ स्वारो लक्ष्यते। सच पदांतवद्वाच्यः॥ वा यदांतस्येति यथा स्यात्। उत्परस्यातः॥ चरफलोरभ्यासा त्परस्यात् उत्स्याद्यङ्लुकोः। हलि चेति दीर्घः। चंचूर्यते। चञ्चूर्यते॥ पंफुल्यते। पं फुल्यते। जपजभदहदशभंजपशांच। एषामभ्यासस्य नुक् स्याद्यङ्लुकोः। गर्हि तं जपति जंजप्यते इत्यादि। ग्रोयङि। गिरते रेफस्य लत्वं स्याद्यङि। गर्हितं गिलति जे गिल्यते घुमास्थेति ईत्वं। गुणः। देहीयते। पेपीयते। सेषीयते। विभाषा श्वेः। शोशूयते। शे श्वीयते। यङि च। सामस्मर्यते। रीङ् ऋतः। चेक्रीयते। लुट्। सिचो यङि। सिचः स स्य षो न स्याद्यङि। निसेसिच्यते। नक वतेर्यङि। कवतेरभ्यासस्य चुत्वं न स्याद्यङि।

कोकुयते। कौतिकुवत्सोस्कन्चोकूयते। नीखंचु। श्रंस। ध्वंस। भ्रंस। कस। पत। पद। स्कन्दां॥ एषामभ्यासस्य नीगागमः स्यात् यङ्लुकोः। श्रकितइत्युक्तेर्नदीर्घः। न्लोपः। वनीवन्च्यते। सनीस्रस्यत इत्यादि। नुगतोनुनासिकांतस्य॥ अनुनासिकांतस्यांगस्य योभ्यासोदंतस्तस्य नुवस्यात्। नुकानुस्वारो लक्ष्यते इत्युक्तं। यंयम्यते। तपरत्वासामर्थ्याद्भूतपूर्वदीर्घस्यापि न। मामन्कोधो। बाभाम्यते। येविभाषा। जाजायते। जंजन्यते। हंतेर्हिंसायां यङि घ्नीभावो वाच्यः। जेघ्नीयते। हिंसायां किं। जंघन्यंते। रीगृदुपधस्य च॥ ऋदुपधस्य धातोरभ्यासस्य रीगागमस्याद्यङ्लुकोर्वरीवृत्यते। क्षुभ्नादित्वान्न णः। मरीमृज्यते। जरीगृह्यते। उभयत्रलत्वं। चलीक्लृप्यते। रीगृत्वत इति वक्तव्यं। वरीवृच्यते। परीपृच्छ्यते। स्वापिस्यमिव्येञां यङि। संप्रसारणं। सोसुप्यते। सेसिम्यते। वेवीयते। नवसः। वावस्यते।

चायःकी। चेकीयते। ईं आध्मो॥ जेघ्रीयते। देध्मीयते। अयङ् पिक्ङिति। शीङोऽयङ्
देशस्याद्यादौक्ङिति परे। शाशय्यते। अभ्यासङ्कस्त तो गुणः। डोढौक्यते। तोत्रौक्यते॥
॥ इतियङन्तप्रक्रिया॥ यङो वि च॥ छयङोप्रत्ययेलुक्स्याच्चकारान्त विनापिजल्वंलु
क्स्यात् अनैमित्तकोयमंतरंगत्वाद्दौभवतिततः प्रत्ययलक्षणेन यङन्तात्वाद्द्वित्वं
। अभ्यासकार्यं। धातुत्वाल्लडादयः। शेषात्कर्तरीतिपरस्मैपदम्। अनुदात्तङितइ
तितुनङित्वस्य प्रत्ययाप्रत्ययसाधारणत्वे प्रत्ययलक्षणप्रवृत्तेः। यत्रहि प्रत्ययस्या
साधारणंरूपमाश्रीयतेतत्रैवत्। अतएवसुहृषप्रत्यासादइत्यत्रत्वासंतस्येतिदी
र्घेनि। यपिस्पर्द्धेशीङादयोनुदात्तङितस्तेभ्योपिन। अनुदात्तङिदित्यनुवंधनिर्दे
शात्। तत्ररितियाशापेतिनिषेधात्। अतएवरयन्तादयोपिगणेनदेशात्। किंतुश

वेव। चर्करीतं चेत्यादादो पाठान्छ्र योर्लुक्। यङोवा। यङन्तात्परस्य हलादेः पितः सा
र्वधातुकस्य ईड्वा स्यात्। भूसुवोरिति गुणनिषेधो यङ्लुकि भाषायां न। बोभूतु ते
तिक्त इति छंन्दसि निपातनात्। अत एव यङ्लुकि भाषायामपि सिद्धिः। न च यङ्लु
कि अप्राप्त एव गुणाभावे निपात्यतामिति वाच्यं। प्रकृती ग्रहणे यङ् तस्यापि ग्रहणा
त्। द्विः प्रयोगो द्विर्वचनं षाष्ठमिति सिद्धांतात्। बोभवीति। बोभोति बोभूतः। बोभुव
ति। बोभवांचकार। बोभविता। अबोभवीत्। अबोभोत्। अबोभूतां। अबोभुवुः। बोभू
यात्। बोभूयातां। बोभूयास्तां। गातिस्थेति सिचोलुक् यङोवेति उपधक्षेगुणं वा प्नि

त्यातिसत्वा लुक्। अबोभूवीत्। अबोभोत्। अबोभूतां। अभ्यस्ताश्रयो जस् नित्य
त्वात्। अबोभुवुः। अबोभविष्यादित्यादि। पास्पर्द्धीति। पास्पर्द्धि। पास्पर्द्धः। पास्पतिः। पा

स्यात्सिद्धि कुरुन्त्योह्र्हे द्वियास्याद्धि। लुङ्। अवास्यत्। अपास्यद्दे। सिपद् अवेती रुत्वपक्षो। रे
रि। अवास्याः। जगाद्धि। जधात्सि। अजधात्। सिपि रुत्वपक्षो। अजावाः। नाथ। नानन्तः। द
धादादद्धि। दादद्धः। दधः। दधित्सति। अदाधत्। अदादद्धाम्। अदादध्कः। अदाधः। अ
दाधत्। ह्रि। अदादाधीत्। अदादधीत्। चोस्कुन्दीति। चोस्कुन्दति। अचोस्कुन्। अचो
स्कुंतां। अचोस्कुंदुः। मोमुदीति। मोमोत्ति। मोमोदां चकार मोमोदिता। अमोमुदीत्। अमो
मोत्। अमोमोतां। अमोमुदुः। अमोमुदी। अमोमोः। अमोमोत्। लुङि गुणः। अमोमोदीत्।
चोकर्त्ति चोकूर्दीति। लङ्। तिपि। अचोकूर्त्। सिपपक्षो। अचोकूः। अचोरदुः। अजोगुः। व
नीवचीति। वनीवक्ति। वनीवक्तः। वनीवञ्चति। अवनीवंचीत्। अवनीवन्। जंगमीत्।
जंगति। अनुदात्तोपदेशवनतितनोत्यादीनामनुनासिकलोपः। जंगतः। जंग्मति॥

सि०
१२५

न्वोऽध्वा जंगन्ता। राकाजग्रहणोक्तत्वान्नेणिषेधः। जंगमिता। अनुनासिकलोपस्याभीय
त्वेन सिद्धत्वाद्देर्नलुक्। जंगहि॥ मोनो धातोः। अजंगन्। अनुबंधनिर्देशान्नहमेरह।
न्म्यन्तेति न वृद्धिः। अजंगमित। अजंगमिष्टां। हन्तेर्यङ्लुक्। अभ्यासाच्चेति कु
त्वं। यद्यपि हो हन्तेरित्यतो हन्तेरित्यनुवर्त्य विहितं तथापि यङ्लुकि भवत्येवेति
न्यासकारः। तिपा शपेति निषेधस्त्वनित्यः। गुणाय लुको रिति सामान्यापेक्षज्ञापका
दिति भावः। जंघनीति। जंघवति जघ्नतः। जंघति। जंघनिता॥ श्तिपा निर्देशाज्जादे
शो न। जंघहि। अजंघनीत्। अजंघन्। जंघन्यात्। आशिषि तु वध्यात्। अवधी
त्। अवधीष्टामित्यादि। वधादेशस्य द्वित्वं तु न भवति॥ स्थानिवत्त्वेनाभ्यासस्येति
निषेधात्। तद्धि समानाधिकरणं धातोर्विशेषणं बहुव्रीहित्वलाभात्। आङ्पूर्वस्तु

१२५

आङो यम हन इत्यात्मनेपदं। आजंघते। इत्यादि। उत्परस्योलितपरत्वान्न गुणः। ह
लिश्वेति दीर्घस्तु स्यादेव। तस्यासिद्धत्वेन लपरत्वनिवृत्त्ययोगात्। चंचूर्ति। चंचु
रीति। चंचूर्त्तः। चंचुरति। अचंचुरीत्। अचंचूः। चंचूर्यनीति। चंचूर्वेति। जनसनो।
यात्वं। चंखातः। गमहनेत्युपधालोपः। चंखुति। चंखादि। चंखना। नि। अचंख
नीत्। अचंखन्। अचंखाताम्। अचंखुः। ये विभाषा। चंखायात्। चंखन्यात्। अ
चंखनीत्। अचंखानीत्। उतोवृद्धिरित्यत्रनाभ्यस्तस्येत्यनुवृत्तेर्नोवृद्धिर्न। योयो
ति। योयवीति। अयोयवीत्। अयोयोत्। योयुयात्। आशिषि दीर्घः। योयूयात्॥ अ
योयावीत्। नोनवानोनोति। जाहोति। जेहाति। ईहत्यघोः। जाहीतः। इह जहातेश्च
आत्वहो लोपो यि। घुमास्थेएर्लिङि इत्येते पंचापि न भवंति। शितपा निर्देशात्।

जाहति। जाहासि। जाहेषि। जाहीथ। जाहीहि। अजाहेत्। अजाहात्। अजाहीतां। अ
जाहुः। जाहीयात्। आशिषि। जाहायात्। अजाहासीत्। अजाहासिष्टां। अजाहि
ष्यत्। लुकालुप्ते प्रत्ययलक्षणाभावात् स्वपिस्यमीत्युत्वं न। तुदादिभ्य इति गण
निर्दिष्टत्वादिह न। सास्वपीति। सास्वप्ति। सास्वप्तः। सास्वपति। असास्वपात्। अ
सास्वपुः। सास्वप्यात्। आशिषि तु वचिस्वपीत्युत्वं। सासुप्यात्। असास्वापीत्।
असास्वपीत्। लुग्विकोश्च लुकि। ऋदुपधस्य धातोरभ्यासस्य लुक् रिक्‌रीक्।
एत आगमाः स्युर्यङ्लुकि। ऋतश्च। ऋदन्तस्य धातोरपि तथा। वर्वर्ति। वरिवर्ति।
वरीवर्ति। वर्वर्त्ति। वावृतीति। वरीवर्ति। वर्वृतः। ई। वर्वर्त्तति। ३ वर्वर्त्ते
मासः। वर्वर्तिता। ३ गणनिर्दिष्टत्वान्न चन्त्यस्य स्यतुर्णपि इति नावर्वर्त्तिष्यति। ३

अवर्ढीत्। ३। अवर्ढत्। ३। आशिषि लिङ्। चक्रियात्। अचकीरीत्। ३। आत ५
श्वेति तपरत्वान्नेह। कॄ विक्षेपे। चाकर्ति। तातर्ति। तार्त्तीतिः। तातरति। तातीर्हि
। तातराणि। अतातारीत्। असवर्णाइ ती यङ्। अरस्त्ती। अयति। अररी। वि। अ
रिपरीति। अर्रोति। अरिर्द्धितः। हि अरद्धि। यण्। तुकोरारीति लोपः। न च स्मिन्कर्ते
व्यायणः स्थानित्वं पूर्वत्रासिद्धे न्निषेधात्। आरति। आरि प्रति। लिङि स्लिपा
निर्द्देशात् गुणोती। लिगुणे न रिङ्। रलोपः। आरियात्। ग्रहू ग्रहणे जर्गृहीत्। ३।
रयात स्ववहिरंगत्वेना सिद्धत्वान्नत्तु गादयः। जागृढः। जागृढेती। जागृढीषि जाग्र
क्षि। लुटि। जाग्रहिता। ग्रहोलिटी तिदीर्घस्तन। तत्रैकाजित्य नुवृत्ते। माधवस्तुदीर्घ
माह। तज्ज्ञाप्यादि विरुद्धं। जर्गृधीति। इ जर्गृढ्ढः। जर्गृघति। जगर्गृधीषि। जर्घोर्त्ति

सि.
१२६

अजर्गर्धीत। ईट्ऽजावेः गुणः। हलं ङ्यादिलोपः। भषभावः। जरत्वचर्त्वे। अजर्घीत। ३
अजर्गर्ध्वां। सिपि दश्चेति पक्षे तु रुत्वम्।। अजर्घाः। अजर्गर्धीति। अजर्गर्धि छांयाम्प्र
च्छीति। पाप्रष्टि। तस्मादो ग्रहिज्येति संप्रसारणं न भवति। स्तिपा निर्देशात्। छ्वोः शूठ्
ङिति शात्वं श्चात्विघ्यः। वाप्रष्ठः। पाप्रच्छति। पाप्रश्मि। पाप्रच्छः। पाप्रश्मः। यकारव
कारांतानां ऊठ्भाविनां यङ्लुङ्नास्तीति छ्वोरिति सूत्रे भाष्ये ध्वनितं केयट
नस्येष्टीकृतमांइदं च छ्वोरिति यत्रोठ् तद्विषयकं। ज्वरत्वरेत्यूठ्भाविनोस्ति
मव्योस्तु यङ्लुगस्त्येवेति न्याय्यं माधवमतं च। मव्य बंधने। अये यांतदृहूमा
वी। इत्यादयो वांतः। हय गतौ। जाहयीति। जाहति। जाहतः। जाहयति। जा
हयीषि। जाहसी। वलिलोपे यजादौ दीर्घः। जाहामि। जाहावः। जाहामः। ह

१२६

र्थातिकाद्योः। जाहयात्। जाहर्ति। जाहन्द्रुः। जाहयंति। लोटि। जाहर्हि। अजाहः। अजा
हर्त्ती। अजाहर्युः। भवबंधने। ज्वरत्वरस्त्रिव्याविमवामुपधायाश्च। ज्वरादीनामुधावका
स्योन्रबस्यात्। क्वौझलादावनुनासिकादौ बप्रत्यये। अत्र क्विति तीनानुवर्त्तते। अवते
स्तुनिश्चोतिरितिनिर्द्देशात्। अनुनासिकग्रहणं चानुवर्त्तते। अवतेर्मनिअत्ययेतस्य
टिलोपेश्चोमितिदर्शनात्। ईडुभावेदृढितिगुणः। मामोति। मामवीति। मामूतः। मामव।
ति। मामीषि। मामावः। माम्नूमः। मामोतु। माम्नूतात्। मामाम्नूहि। मामवानि। अमामोत्। अमा
मोः। अमामवं। अमामावः। अमामूमः। तुर्वी हिंसायां। तोतुर्वीति। राल्लोपः। रेफात्स्योश्छो
र्लोपिः स्यात्। क्वौझलादावनुनासिकादौ च प्रत्यये। उपधायां च। तोतोर्त्ति। नोपधगुणः। नधातु
लोपआर्द्धधातुके। धातोर्लसलोपोनिमित्ते आर्द्धधातुकेपरे इकोगुणवृद्धी नस्तः। इतिनेह

सि॰
१२७

निषेधः। तिवादीनामनार्द्धधातुकत्वात्। ततोर्त्ति। ततोहलि चेति दीर्घः। ततोर्त्तेः। ततोवीति। तो
थोर्त्ति। दोधोर्त्ति। मूर्छा। मोमोर्त्ति। मोमूर्त्तः। मोमूर्छतीत्यादि। आर्द्धधातुक इति विषय सप्तमी॥
तेन यङि विवक्षिते। अजेवीर्वेवीयाति। अस्य यङ्लुङ्नास्ति। लुकापहारेण विषयत्वासं
भवेनवी। भावस्याप्रवृत्तेः॥ इति यङ्लुगन्ताः एकि सुप। आत्मनक्यच्॥ इषिकर्मण एषि
त्रसंबंधिनः। सुबन्तादिच्छायामर्थेक्यच् प्रत्ययोस्यात्। धातवयवत्वात्सुपलुक्। क्यच
च्चि च। अवर्णस्य ई इत्यादि त्। आत्मनः पुत्रमिच्छति पुत्रीयति। वांन्तो यि प्रत्यये। गव्य
ति। नाव्यति। लोपः शाकल्यस्येति न। अपदान्तत्वात्। तथाहि। नःक्ये। क्यचि क्यङि
जात्वपदं भेदं स्यात्। नान्यत्र। सन्निपातपरिभाषया क्यच्चोयस्येति। लोपोनगव्यां
चकारः। गव्यिता। नाव्यांचकार। नाव्यिता। हलोपः। राजीयत प्रत्ययो करपदयोश्च।

१२७

लघति। मघति। एकांपयारिस्येन। युअघति। अंस्मघति। हलि च। गांयीति। र्य्यतिघा
तोस्त्येव। नेह। दिवमिच्छति दिव्यति। इहपुरमिच्छतिपुर्यति इतिमाधवेनोप्रत्युदाह
रणंचिंत्या। घुर्गिरिः साम्यत। दीव्यतीति दीर्घ। वस्तुप्राञ्चः प्रामाविकएव। अदस्यति। रीदृ
तः। कत्रीयति। क्यच्च्यो श्र। गार्गीयति। च्यति। अह्नत्से तिदीर्घः। कवीयति। सामिध्यति।
व्यस्य विभाषा। हलपरायोः क्यच्व्यवलोपेपिवास्यात्। दाद्वालुके। आदेः परस्यावस्य ऽ
अलोलोपः। तस्यस्थानिवलाल्लघूपधगुणो। समधिता। समिध्यति। मांतप्रच्छतिका
त्सुवंताद्व्ययाच्च्चून्। कमिच्छातिइदमिच्छति। स्वरिच्छति। अशनायोदन्य धनाया
बुभुक्षापिपाशागर्द्धेषु। क्यजंता निपात्यंते। अशनायति। उदन्यति। धनायति। बुभुक्षा
दोकिं। अशनीयति। उदकीयति। धनीयति। अश्वक्षीरवृषलवणानामात्मप्रीतो क्यचि

।एषां क्यचि परे सुगागमः स्यात्।अश्ववृषयोर्मैथुनेच्छायां।अश्वस्यति।वडवा।वृषस्यति गौः।क्षी
रलवणयोर्लालसायां।क्षीरस्यति बालः।लवणस्यति उष्ट्रः।सर्वप्रातिपदिकानां क्यचि लालसा
यां सुगसुकौ।दधिस्यति।दध्यस्यति।मधुस्यति।मध्वस्यति।काम्यच्च।उक्तविषये काम्य
च्स्यात्।पुत्रमात्मन इच्छति पुत्रकाम्यति।इदुदुपधस्य चाप्रत्ययस्य इति षत्वं न।अनर्थकत्वात्
।यस्येति संघातग्रहणमित्युक्तं।यशस्काम्यति।सर्पिष्काम्यति।मान्ताव्ययेभ्योप्य
यं स्यादेव।किंकाम्यति।स्वःकाम्यति।उपमानादाचारे।उपमानात्कर्मणः सुबंतादाचा
रार्थे क्यच्स्यात्।पुत्रमिवाचरति पुत्रीयति।छात्रं विष्णूयति द्विजं।अधिकरणाच्चे
ति वक्तव्यम्।प्रासादीयति कुट्यां भिक्षुः।कुटीयति प्रासादे।कर्त्तुः क्यङ् सलोपश्च।उ
पमानात्कर्त्तुः सुबंतादाचारे क्यङ् वा स्यात्।सांतस्य तु वाच्यकस्य लोपो वा स्यात्।क्यङि

वेत्युक्ते पक्षेवाक्यंसात तस्यलोपः स्तुरक्यङ् संन्नियोगशिष्टः सन्नव्यवस्थितः। ओज
सोप्सरसोर्नित्यमितपरेषांभाषाया। हलन्त इवाचरति हलन्तायते। ओजशब्दोवृत्ति
विषयेतद्वृत्ति। ओजायते। अप्सरायते। यसायते। यशस्यते। विद्वायते विद्वस्य
तो स्यते। मयते। अनेकार्थत्वेतु। युष्मयते। क्यङ् मानिनोश्च। कुमारीवाचरति
कुमारयते। हरिणीवद्धरितायते। गुर्वीविगुर्वूयते। सपत्नायते। तपतीयते। युवतिर्
रिवयुवायते। पद्वीम्रद्वीविव पद्वीम्रद्यते। नकोपधायाः। पाचिकायते॥ आचार
वगनल्कीवहोडेभ्यः क्विप्वा। वाग्रहणात् क्यङपि। अवगल्भादरः पचाद्यजन्ताः क्विप्स
न्नियोगेनाडदात्तसामर्थ्यात्। न चावगल्भते इति द्विसिद्धिरुतत्फलंकेवलानामेवा
चारेसम्भवात्। धातूनामनेकार्थत्वात्। अवाल्भाच्चक्रोकीवाञ्चके। होः राञ्च

क्वेः। वार्त्तिके वेसुपसर्गविशिष्टपाठात्केवलादुपसर्गान्तरविशिष्टाच्च क्यप्वेति माधवा
दयः। तङ्‌ नेति लक्षितम्। सर्वप्रातिपदिकानां क्विब्वा वक्तव्यः। पूर्ववार्त्तिकं तु अनुब
न्धसञ्ज्ञार्थं तत्र क्विबनूद्यते। प्रातिपदिकग्रहणादिह सुप इति न सम्बध्यते। तेन
पदकार्यं न। कृष्ण इवाचरति कृष्णति। अतो गुण इति शपा सह पररूपम्। अ इ
वाचरति अति। अतः। आन्तौ प्रत्ययग्रहणमपनीय अनेकाच इत्युक्ते नाम्। औ
। अतुः। उः। द्वित्वम्। अतो गुणे। आ आदेरिति दीर्घः। णलन्औ। वृद्धिः। अत्सुसादिषु
तु ओतो लोप इटि च। स्यात्स्यालोपः। मालेवाचरति मालाति। लिङ्गविशिष्टपरिभा
षया एकादेशस्य पूर्वान्तत्वाद्वा क्विप्। मालाः अकारालङि। अमालात्। अत्रह।
ल्यादिलोपो नङी साहचर्यादापो पिसोरेव लोपविधानात्। ईदासको। अमाला

सीत्। अत्र हल्ड्याद्लोपान्ङीसाहचर्यादापो पिसोरेव लोपविधानात्। ईयसकौ। अमाला
कविरवककवयलि। आशीर्लिङि कवीयात् सिचि वृद्धिरित्यत्र धातोरित्यनुवर्त्य धातुरेव
यो धातुरिति व्याख्यानान्नामधातोर्न वृद्धिरिति कैयटादयः। अकवयीत्। माधवस्तु न
मधातोरिति वृद्धिमिच्छति। अकवायीत्। अकवयीत्। विरिवावयति। विवाय। वि
व्यतुः। वयीत्। अवायीत्। श्रीरिव। श्रयति। शिश्रिवतु। पितेष्टवपितराति। आशिषि रि
ङापित्रियात्। भूरिवाभवति। अत्र गातिस्थेति सुघोवुवन्न्यप्। ज्ञापकस्य विशेषविषय
त्वे धाष्टं वार्तिकं तद्भाष्यं च प्रमाणान्। तथा हि। उस्योमाङ्क्ष्वाटः प्रतिषेधः। उसि ओमा
ङो अवपरयो राटः पररूपं नेत्यर्थः। उस्त्रमैच्छदोस्त्रीयत्। ओङ्कारीयत्। ओढीयत्। आ
टश्चेति चशब्देन पुनर्वृद्धिविधानादिदं सिद्धमिति षष्ठुस्थितम्। खोद्दितादिङाऽम्यः

शलोहितादिभ्योडाजन्ताच्च भवत्यर्थे क्यष् स्यात्। वा क्यषः। क्यषन्तात्परस्मैपदं वा स्यात्।
लोहितायति। लोहितायते। अत्रा च्वेरित्यनुवृत्त्याऽभूततद्भावविषयत्वं लभ्यम्। तच्च
लोहितशब्दस्यैव विशेषणम्। न तु डाचोसम्भवात्पट्पटाय्यादिशब्दग्रहणं तस्य प्रत्या
ख्यानात्। तथा च वार्त्तिकम्। लोहितडाभ्यः क्यष्वचनं भृशाडाचः। डाजन्तात्क्यषो
विधानसामर्थ्यात्। यत्तु लोहितश्यामदुःखहर्षगर्वसुखादिवा मूर्च्छा निद्रा कृपा धू
माः करुणा नित्यचर्मणः॥ इति पठित्वा श्यामादिभ्योपि क्यषमुदाहरन्ति तद्भा
ष्यवार्त्तिकविरुद्धम्। तस्मात्तेभ्यः क्यङेव श्यामायते। दुःखायते। वृत्तिविषये तदु
तिवर्त्तन्ते। लिङ्गविशिष्टपरिभाषया लोहिनीशब्दादपि क्यष्। लोहिनीयति। लो
हिनायते। कष्टाय क्रमणे। चतुर्थ्यन्तात्कष्टशब्दादुत्साहेर्थे क्यङ् स्यात्। कष्टाय क्र

मतेकष्टायते। पापकर्त्तुमुत्सहत इत्यर्थः॥ सत्त्रकष्टकृच्छ्रगहनेभ्यः कण्वचिकीर्षायामि
तिवक्तव्यम्। कण्वम्पापम्। सत्त्रादयो वृत्तिविषये पापार्थाः। तेभ्यो द्वितीयान्तेभ्यश्चिकी
र्षायां क्यङ्। पापं चिकीर्षतीत्यस्वपदविग्रहः॥ सत्त्रायते। कक्षायते इत्यादि॥ कर्म
णो रोमन्थतपोभ्यां वर्त्तिचरोः॥ रोमन्थतपोभ्यां कर्मभ्यां क्रमेण वर्त्तनायां चरणे चार्थे
क्यङ् स्यात्॥ रोमन्थं वर्त्तयति रोमन्थायते। हनुचलन इति वक्तव्यम्। चर्वितस्या
हस्य पुनश्चर्वणे इत्यर्थः॥ नेह। कीटो रोमन्थं वर्त्तयति। अपानप्रदेशान्निःसृत
द्रव्यमिह रोमन्थः। तदश्नातीत्यर्थ इति। कैयटः। वर्त्तुलं करोतीत्यर्थ इति न्यास
कारहरदत्तौ। तपसः परस्मैपदं च। तपश्चरति तपस्यति। बाष्पोष्मभ्यामुद्वम
ने। आभ्यां कर्मभ्यां क्यङ् स्यात्। बाष्पमुद्वमति बाष्पायते। फेनाच्चेति। वक्तव्यं। फे

नायते। शब्दवैरकलहाभ्रकण्वमेघेभ्यः करणे। एभ्यः कर्मभ्यः करोत्यर्थे क्यङ्॥ स्यात्।
शब्दं करोति शब्दायते। पक्षे तत्करोतीति णिजपीष्यत इति न्यासकारः। शब्दयति॥ सु
दिनदुर्दिननीहारेभ्यश्च। सुदिनायते। सुखादिभ्यः कर्तृवेदनायां। सुखादिभ्यः
कर्मभ्यः॥ वेदनायामर्थे क्यङ् स्यात् वेदनाकर्तुरेव चेत्सुखादीनि स्युः। सुखं वेदय
ते सुखायते। कर्तृग्रहणं किं। परस्य सुखं वेदयते। नमोवरिवश्चित्रङः क्यच्।
करण इत्यनुवर्तते क्रियाविशेषे॥ पूजायां परिचर्यायामाश्चर्ये च। नमस्यति दे
वान्। पूजयति इत्यर्थः। वरिवस्यति गुरून्॥ शुश्रूषत इत्यर्थः। चित्रीयते वि
स्मयत इत्यर्थः। विस्मापयत इत्यन्ये। पुच्छभाण्डचीवराण्णिङ्। पुच्छादुदसन
पर्यसने च। विविधावरुद्धं चोत्क्षेपणं व्यसनं। उत्पुच्छयते। परिपुच्छ॥यते।

भाण्डात्समाचयने। यभाण्डयते। भांडानिसमाचिनोतिराशीकरोतीत्यर्थः ४। समव॥

भाण्डचीवराद्‌र्जनेपरिधानेचासंचीवरयतेजाभिक्षुःचीवराण्यर्जयति। परिधु

त्तेइत्यर्थः। मुंडमिश्रश्लक्ष्णलवणाव्रतवस्त्रहलकलकृततूस्तेभ्योणिच्। कृतर्थे

। मुंडंकरोतिमुण्डयति। व्रताद्भोजनतन्निवृत्त्योः ४। पयः व्रतयतिवस्त्रात्स

माच्छादनेसंवस्त्रयति। हलादिभ्योग्रहणे। हलिकल्योरदन्तत्वंचनिपात्यते।

हलिंकलिंचगृह्णातिहलयति। कलयति। महद्धलंहलिः परत्वाद्वृद्धौतस्यानपि

इष्ठवद्भावेनागेवलुप्यते। अतः सन्वद्भावदीर्घौनाजहलत्। अचकलत। कृतं

गृह्णातिकृतइति। तूस्तानिविहन्तिवितूस्तयति। तूस्तकेशइत्येके। पापमित्य

परे। मुण्डादयः सत्यापेत्यत्रैवपठितुंयुक्ताः। प्रातिपदिकाद्धात्वर्थइत्येवसिद्धके

षेचिदृणांसापेक्षेभ्योपि णिजर्थी मंडयति मार्गं वा मिश्रयत्यन्तां श्लक्ष्णयति वस्त्रां स
वर्णायति व्यंजनमिति। हलकलयोरत्वार्थी। सत्यस्यापुगर्थी। केषांचिद्गुणप्रपंचार्थं
सत्यंकरोत्याचष्टे वा सत्यापयति। अर्थवेदयोरप्यापुग्वक्तव्यः। अर्थापयति वेदा
पयति पाशाद्विमुञ्चति पाशयति। रूपं पश्यति रूपयति। वीणयोपगायति उप
वीणयति तूलेनानुकुष्णाति अनुतूलयति। गणागंतूलेनानुघट्टयतीत्यर्थः।
श्लोकैरुपस्तौति उपश्लोकयति। सेनयाभियाति अभिषेणयति। उपसर्गा
त्सुनोतीति षः। अभ्यषेणयत्। प्राक्सितादिति षः। अभिषिषेणयिषति। स्थादि
ष्वभ्यासेन चेति षः। लोमान्यनुमार्ष्टि अनुलोमयति। त्वचं गृं वरणे त्वः। त्वचं गृ
ह्णाति त्वचयति वर्मणा संनह्यति संवर्मयति। वर्णं गृह्णाति वर्णयति। चूर्णैरव

ध्वंसते। चूर्णयति। दृष्टवत्यति देवासुंवज्राद्यः। एनीमाच्चष्टे एनीएत
यति। दरदमाचष्टे दारदयति। पृथुं प्रप्रथयति। वृद्धौ मत्सांप्र्ववाटिलोपः।
अपिप्रथत्। अपप्रथत्। मृदुं म्रदयति। अमिम्रदत्। अममम्रदत्। भ्रशं
दृढ्ढं। भ्रशयति। क्रशयति। द्रढयति। अबभ्रशत्। अचक्रशत्। अद
द्रढत्। परिब्रढयति। पर्यवब्रढत्। ऊढिमाख्यत्। औजिढत्। ढत्वादीनामसि
द्धत्वात् ढ इति शब्दस्य द्वित्वं। पूर्वत्रासिद्धीयमद्वित्व इति तु अनित्यमित्युक्तं
ढिइत्यस्य द्वित्वमित्यन्ये। औडिढत्। ऊढमाख्यत्। औड्ढत्। ओः पुयण्ज्यपरे
तिवर्गप्रत्याहारजग्रहो लिंगं द्वित्वे कार्ये णावच्चआदेशो नेति ज्ञनयता वु
क्तं। प्रकृत्यैकाच्। वद्धिपुकौ। स्वापयति। स्वां मां वाचष्टे स्वापयति मापयति

सि॰
१३३

मपर्यंतस्यत्वमौ पररूपात्स्। नित्यत्वाद्धिलोपः। वृद्धिः। पुक्। त्वाद्यतिमाद्य
ति। इति तु न्याय्यं। अंतरंगत्वात्।। सरन्नू पैष्ठकं ते प्रकृत्यैकाजिति प्रकृतिभा
वात्। न च प्रकृतिभावो भाष्ये प्रत्याख्यात इति भ्रमितव्यं। भाष्यस्य प्रेष्ठा
द्युदाहरणविशेषेणान्यथासिद्धत्वात्। युवामावांवा युष्मयति। अस्मयति।।
श्वानमाचष्टे शावयति। नस्तद्धित इति टिलोपः। प्रकृतिभावस्तु नयेन
नाप्राप्तन्यायेन टेरित्यस्यैव बाधको हि सः। मत्वात्सं प्रसारणं। अन्ये तु न
स्तद्धित इति नेहातिदिश्यते। इष्ठनित्यस्यादृष्टत्वात्। अस्तीष्ट इत्यादौ
परत्वाट्टेरित्यस्यैव प्रवृत्तेः। तेन श्रुनयतीति रूपमाहुः। विद्वांसमाच
ष्टे विद्वयति। अंगवृत्ति परिभाषया संप्रसारणं नेत्येके। संप्रसारणं च

१३३

ध्यावादेनगैन्चविदावयतीत्यन्न्येनित्यत्वाट्टिलोपात्प्राक्संप्रसारणं। अंतरं गत्वात्कूर्वनूपंटि
लोपः॥विदयतीत्यपदेभ्यउदंचमाचष्टे उदीचयति।ऊदेचिचत्।तिर्यञ्चमाचष्टेतिरा
ययति।अंचोष्टलोपोनाऽपहारेपिवहिरंगत्वेनाभिद्धत्वात्तिरयः स्तिरिः।अग्निद्ध्वद
त्रेक्षिंचिणो।लुकन्यायेनप्रथमटिलोपोसिद्धः।अतःपुनःष्टिलोपोना।अंगवत्त्विपरि
भाषयावा।च॥डिः अष्ठोपित्वादुपधाङ्खोन।अतितिरायत्।सध्र्यंचमाचष्टे स
ध्राययति।असस॥ध्रायत्।विष्वड्यन्चा।अविविष्वड्रायत्।देवड्यंचं।अदिदेव
ड्रायत्।अदड्यंचं।आदद॥ड्रायत्।अमुमुयञ्चं।अमुमुआययति।चङ्।आमु
मुआयत्।अदमुयञ्चं।अदमुआय॥यति।आदद्मुआयत्।भुवंभावयति।अ
वीभवत्।भुवंअबुभुवत्।श्रियंअशिश्रियत्।गामजूगवत्।रायमरीरयत्।

नावमनूनवत्। स्वश्वंस्वाशश्वत्। स्वः स्वयति असस्वत्। असिस्वत्। बहून् भावय
ति। वहयती त्यन्ये। स्रग्विणं स्रजयति। संज्ञा एवं कलान्तवद्धिः। श्रीमती श्रीमंतंवा
। श्राययति। अशिश्रयत्। पयस्विनी पयसयति। इह टिलोपो नतदपवादस्य वु
कः प्रवृत्तत्वात्। स्थूलंस्थवयति। दूरं० दवयति। कथंत र्हि दूरयत्यवनतेविव
स्वती। दूरंमततिअयनेवादूरात्। दूरांतंकुर्वती त्यर्थः। युवानंयवयति कनय
ति। युवाल्पयोरिति वा कन्। अंतिकं नेदयति। वाढं० साधयति। प्रशस्यस्य प्र
श।। स्यति।। इह श्र ज्योन। उपसर्गस्य पृथक् वेः। वृद्धं ज्यायपयती वर्षयति। प्रि
यं० प्रा प।। यति। स्थिरं स्थापयति स्फिरं स्फाययति। उरुं वनयति। वारयति। व
हुलं वंहयति गुरुं गरयति। तृप्रं० त्रपयति। दीर्घं द्राघयति। वृंदारकं वृन्दय

ति॥ ५ ॥इतिनामधातुप्रक्रिया॥ ५॥ कंड्वादिभ्योयक्।एभ्योधातुभ्योनित्यं
यक्स्यात् स्वार्थे।धातुभ्यः किं॥प्रातिपदिभ्योमाभूत्।द्विधाहिकंड्वादयः।धा
तवः प्रातिपदिकानिच।कंडूयगात्रवि॥घर्षणे।कंडूयति।कंडूयते।मंतु
अपराधे।रोषइत्येके।मंतूयति।चंद्रस्तुजितमा॥हे।मंतूयते।वल्गुपू
जामाधुर्ययोः।वल्गूयति।असुउपतापे।असअसुञ्इत्येके॥।असूयति।
असूयति।असूयते।लेट्लोट्धौत्यर्थेपूर्वभावेस्वप्नेचादीप्तावित्येके।
लेट्यति।लोट्यति।लेटिता।लेलोटी।लो।इरसइरजइरञ्ईर्ष्यायां।इर
स्यति।इरज्यति।हलिश्चेतिदीर्घः।ईर्यति।ईर्यते।उषसप्रतीभावे।वेदधौ
र्त्येस्वप्नेच्वा।मेधाआशुग्रहणे।मेधायति।कुशुभक्षेपे।कुषुभ्यति।मगधपप

सि॰
२३५

